त्सस्य । वत्सस्यवावृधे । ववृधइतिववृधे ॥२॥ ६ ॥ इतिक्रमपाठेसप्तमोध्यायः ॥ ७ ॥ ६ ॥ आदि
त्येभ्यस्त्वा । त्वेतित्वा ॥१॥ कदाचन । चनप्र । प्रयुच्छसि । युच्छस्युभे । उभेनि । उभेइत्युभे । निपासि । पा
सिजन्मनी । जन्मनीइतिजन्मनी । तुरीयादित्य । आदित्यसवनम् । सवनंते । तइंद्रियम् । इन्द्रियमा ॥४९॥
तस्थौ । आतस्थौ । तस्थावमृतं । अमृतंदिवि । दिव्यादित्येभ्यः । आदित्येभ्यस्त्वा ॥ त्वेतित्वा ॥२॥ यज्ञो

२+ वरिवोवित्तरासत्।

देवानाम्।देवानांप्रति।प्रत्यैति।एतिसुम्नं।सुम्नमादित्यासः।आदित्यासोभवत।भवतामृळयंतः।
मृळयंतइतिमृळऽयंतः।आवः।वोर्वाची।अर्वाचीसुमतिः।सुमतिर्ववृत्यात्।सुमतिरिसुऽमतिः।व ति २
वृत्यादंहोः।अंहोश्चित्।चिद्या।यावरिवोवित्तरा।वरिवोवित्तरेतिवरिवोवित्ऽतरा।असदादित्येभ्यः।
आदित्येभ्यस्त्वा।त्वेतित्वा।विवस्वं।आदित्य।आदित्यैषः।एषते।तेसोमपीथः।सोमपीथस्तस्मिन्।
सोमपीथइतिसोम।पीथः।तस्मिन्मत्स्व।मत्स्वेतिमत्स्व॥४॥श्रदस्मै।अस्मैनरः।नरोवचसे।वचसे
दधातन।दधातनयत्।यदाशीर्दाः।आशीर्दादंपती।आशीर्दाइत्याशीःऽदाः।दंपतीवामम्।दंपतीइति
दम्।पती।वाममश्नुतः।अश्नुतइत्यश्नुतः।पुमान्पुत्रः।पुत्रोजायते।जायतेविंदते।विंदतेवसु।वस्वधा।
अधाविश्वाहा।विश्वाहारपः।अरपएधे।एधतेगृहे।गृहइतिगृहे॥५॥वाममद्य।अद्यसवितः।
सवितर्वामम्।वाममुश्वः।उइत्यो।श्वोदिवे।दिवे।दिवेदिवेवामम्।दिवेदिवइतिदिवे।दिवे।वामम
स्मभ्यम्।अस्मभ्यंसावीः।सावीरितिसावीः।वामस्यहि।हिक्षयस्य।क्षयस्यदेव।देवभूरेः।भूरे

२ यज्ञपतिंभिर्जिन्वयज्ञऽपतिम्। २ जिन्व ८८

॥५०॥ रय्या।रय्याधिया।धियावामभाजः।वामभाजःस्याम।वामभाजइतिवामऽभाजः।स्यामेतिस्याम॥१॥
सावित्रोसि।असिचनोधाः।चनोधाःश्चनः।चनोधाइतिचनःऽधाः।चनोमयि।मयिधेहि।धेहिजिन्व।यज्ञं।
यज्ञंजिन्व।जिन्वयज्ञपतिं।यज्ञपतिंभगाय।भगायसवित्रे।सवित्रेत्वा।त्वेतित्वा॥१॥सुशर्मासि।सुशर्मेति
सुऽशर्मा।असिसुप्रतिष्ठानः।सुप्रतिष्ठानोबृहदुक्षाय।सुप्रतिष्ठानइतिसुऽप्रतिस्थानः।बृहदुक्षायन
मः।बृहदुक्षायेतिबृहत्ऽउक्षाय।नमइतिनमः॥१॥बृहस्पतिसुतस्यते।बृहस्पतिसुतस्येतिबृहस्पतिऽ
३ सुतस्य।तेदेव।देवसोम।सोमेंदो।इंदइंद्रियावतः।इंदोइतींदो।इन्द्रियावतःपत्नीवतः।पत्नीवतोग्रहान्।
२ पत्नीवतइतिपत्नीऽवतः।ग्रहाँऋध्यासं।ऋध्यासमित्यृध्यासं॥१॥अहंपरस्तात्।परस्तादहम्।अहम्
मवस्तात्।अवस्ताद्यत्।यदन्तरिक्षम्।अन्तरिक्षंतत्।तदुमे।मेपिता।उइत्यु।पितासीत्।आसीत्स्यास।अ
हंसूर्यं।सूर्यमुभयतः।उभयतोददर्श।ददर्शाहम्।अहंदेवानां।देवानांपरमं।परमंगुहा।गुहायत्। ॥५०॥
यदितियत्॥२॥अग्नेवाकक्षा।वाक्पाति।पातिसजूः।सजूर्देवेन।सजूरितिसऽजूः।देवेनत्वष्ट्रा।त्वष्ट्रासो
मम्।सोमंपिब।पिबस्वाहा।स्वाहाप्रजापतिः॥३॥प्रजापतिर्वृषा।प्रजापतिरितिप्रजाऽपतिः।वृषासि।
हा
ति, + इन्द्रियवंततोमिन्द्रियऽवतः।
६

+ अश्वसनिर्भक्षः।

असिरेतोधाः। रेतोधारेतः। रेतोधाइतिरेतः धाः। रेतोमयि। मयिधेहि। धेहिप्रजापते। प्रजापतेत्वे।
प्रजापतिरितिप्रजाऽपतिः। त्वेवृष्णः। वृष्णोरेतोधसः। रेतोधसोरेतोधाम्। रेतोधसइतिरेतः। धसः। रेतोम
धामशीय। रेतोधामितिरेतः। धाम्। अशीयेत्यशीय॥७॥८॥ हरिरसि। असिहारियोजनः। हारियोज
नोहरिभ्यां। हारियोजनइतिहारिऽयोजनः। हरिभ्यांत्वा। हरिभ्यामितिहरिऽभ्यां। त्वाहर्योः। हर्योर्धानाः।
धानास्थ। स्थसहसोमाः। सहसोमाइन्द्राय। सहसोमाइतिसहऽसोमाः। इन्द्राय॥१॥ यस्ते। तेदेव। देवसोम। सोम
श्वसनिः। अश्वसनिरित्यश्वऽसनिः। भक्षोयः। योगोसनिः। गोसनिस्तस्य। गोसनिरितिगोऽसनिः। तस्य
ते। तइष्टयजुषः। इष्टयजुषस्तुतस्तोमस्य। इष्टयजुषइतीष्टऽयजुषः। स्तुतस्तोमस्यशस्तोक्थस्य। स्तुत
स्तोमस्येतिस्तुतऽस्तोमस्य। शस्तोक्थस्योपहूतः। शस्तोक्थस्येतिशस्तऽउक्थस्य। उपहूतउपहूतस्य। उ
पहूतइत्युपऽहूतः। उपहूतस्यभक्षयामि। उपहूतस्येत्युपऽहूतस्य। भक्षयामीतिभक्षयामि॥२०॥८॥
युक्ष्वाहि। हिकेशिना। केशिनाहरी। हरीवृषणा। वृषणाकक्ष्यप्रा। कक्ष्यप्रेतिकक्ष्यऽप्रा। अथानः। नइन्द्र।
इन्द्रसोमपाः। सोमपागिराम्। गिरामुपश्रुतिम्। उपश्रुतिंचर। उपश्रुतिमित्युपऽश्रुतिम्। चरेतिचर।
सोमपाइतिसोमऽपाः। हरीइतिहरी।

॥५१॥ इंद्राय त्वा। त्वा षोळशिने। षोळशिन एषः। एष ते। ते योनिः। योनिरिंद्राय। इंद्राय त्वा। त्वा षोळशिने। १०१
षोळशिन इति षोळशिने ॥१॥ आ तिष्ठ। तिष्ठ वृत्रहन्। वृत्रहन्रथं। वृत्रहन्निति वृत्रऽहन्। रथं युक्ता।
युक्ता ते। ते ब्रह्मणा। ब्रह्मणा हरी। हरी इति हरी ॥ अर्वाचीनं सु। सु ते। ते मनः। मनो ग्रावा। ग्रावा कृणोतु।
कृणोतु वग्नुना। वग्नुनेति वग्नुना ॥२॥ इंद्रमित्। इद्धरी। हरी वहतः। हरी इति हरी। वहतो प्रतिधृष्टशव
सम्। अप्रतिधृष्टशवसमित्यप्रतिधृष्टऽशवसम्। ऋषीणां च। च स्तुतीः। स्तुतीरुप। उप यज्ञम्। य
ज्ञं च। च मानुषाणां। मानुषाणामिति मानुषाणां ॥३॥ यस्मान्न। न जातः। जातः परः। परो अन्यः। अ
न्यो अस्ति। अस्ति यः। य आविवेश। आविवेश भुवनानि। भुवनानि विश्वा। विश्वेति विश्वा ॥ प्रजापतिः
२ पतिः प्रजया। प्रजापतिरिति प्रजाऽपतिः। प्रजया संरराणः। प्रजयेति प्रऽजया। संरराणस्त्रीणि। संरराण इति सं
ऽरराणः। त्रीणि ज्योतींषि। ज्योतींषि सचते। सचते सः। स षोळशी। षोळशीति षोळशी ॥१॥ इंद्र ॥५१॥
श्च। च सम्राट्। सम्राड्वरुणः। सम्राडिति सम्ऽराट्। वरुणश्च। च राजा। राजा तौ। तौ ते। ते भक्षम्।

आविवेशासोऽध्वुनेशा। ४

५

वर्चसे एषः। एषते। ते योनिः। योनिरग्नये। अग्नयेत्वा। त्वावर्चसे

भक्षंचक्रतुः। चक्रतुस्तयोः। अर्थंरातम्। रातमित्येतुं। तयोरहम्। अहमनु। अनुभक्षं। भक्षंभक्षयामि। भ
क्षयामिवाक्। वाग्देवी। देवीजुषाणा। जुषाणासोमस्य। सोमस्यतृप्यतु। तृप्यतुसह। सहप्राणेन। प्रा
णेनस्वाहा। स्वाहेतिस्वाहा॥१॥ अग्नआयूंषि। आयूंषिपवसे। पवसआसुव। आसुव। सुवोर्जं। ऊर्जमि
षंच। चनः। नइतिनः। आरेबाधस्व। बाधस्वदुच्छुनां। दुच्छुनामितिदुच्छुनां। अग्नयेत्वा। त्वावर्चसे।
वर्चसेग्ने। अग्नेवर्चस्विन्। वर्चस्विन्वर्चस्वान्। वर्चस्वांस्त्वं। त्वंदेवेषु। देवेष्वसि। असिवर्चस्वान्। वर्चस्वा
नहं। अहंमनुष्येषु। मनुष्येषुभूयासम्। भूयासमितिभूयासं॥१॥ अग्नेपवस्व। पवस्वस्वपाः। स्वपा
अस्मे। अस्मेवर्चः। अस्मेइत्यस्मे। वर्चःसुवीर्यम्। सुवीर्यमितिसुऽवीर्यं। दधद्रयिं। रयिंमयि। मयि
पोषम्। पोषमितिपोषं॥१॥ उत्तिष्ठन्नोजसा। उत्तिष्ठन्नित्युत्ऽतिष्ठन्। ओजसासह। सहपीत्वी। पी
त्वीशिप्रे। शिप्रेअवेपयः। अवेपयइत्यवेपयः। सोममिंद्र। इंद्रचमू। चमूसुतं। चमूइतिचमू। सु
तमितिसुतं। इन्द्रायत्वा। त्वौजसे। ओजसइन्द्र। इन्द्रौजस्विन्। ओजस्विन्नोजस्वान्। ओजस्वापुं
ॐजसएषः। एषते। ते योनिः। योनिरिंद्राय। इंद्रायत्वा। त्वौजसे।

स्वपार
तिसुभे
षाः।

शिप्रइति
शिप्रे।
+ २

१०२

स्व २

॥५२॥ स्त्वं। त्वंदेवेषु। देवेष्वसि। अस्योजेस्त्वानू। ऽजेस्त्वांनुहं। अहंमनुष्येषु। मनुष्येषुभूयासं। भूयासमिति
भूयासं॥१॥ अदृश्रमस्य। अस्यकेतवः। केतवोवि। विरश्मयः। रश्मयोजनानू। जनांअनु। अन्वित्यनु।
भ्राजंतोअग्नयः। अग्नयोयथा। यथेतियथा। सूर्यायत्वा। भ्रौजेचो। भ्राजराषः। राषतें। तेयोनिः। योनिः
सूर्याय। सूर्यायत्वा। त्वाभ्राजे। भ्राजेसूर्य। सूर्यभ्राजस्वन्। भ्राजस्वन्भ्राजस्वानू। भ्राजस्वाऽस्त्वमू। त्वंदेवे
षु। देवेष्वसि। असिभ्राजस्वानू। भ्राजस्वानुहं। अहंमनुष्येषु। मनुष्येषुभूयासं। भूयासमितिभूयासं॥१॥
उदुत्यं। तुंइत्य। त्यंजातवेदसं। जातवेदसंदेवं। जातवेदसमितिजातऽवेदसं। देववहंति। वहंतिके
तवः। केतवइतिकेतवः। दृशेविश्वाय। विश्वायसूर्यं। सूर्यमितिसूर्यं॥१॥ चित्रंदेवानां। देवानामुद।
उदगात्। अगादनीकं। अनीकंचक्षुः। चक्षुर्मित्रस्य। मित्रस्यवरुणस्य। वरुणस्याग्नेः। अग्नेरित्य
ग्नेः। आप्राः। अप्राद्यावापृथिवी। द्यावापृथिवीअंतरिक्षं। द्यावापृथिवीइतिद्यावापृथिवी। अंतरि ॥५२॥
क्षंसूर्यः। सूर्यआत्मा। आत्माजगतः। जगतस्तस्थुषः। तस्थुषश्च। चेतिच॥१॥ विनः। नइन्द्र।

३ एषते। तेयोनिः। योनिरिंद्राय। इंद्रायत्वा। त्वाविमृधे। विमृधइति वि ऽ मृधे। +

१०४

इंद्रमृधः। मृधोजहि। जहिनीचा। नीचायछ। यछपृतन्यतः। पृतन्यतइति पृतन्यतः। योअस्मान्। अ
स्मांअभिदासति। अभिदासत्यधरं। अभिदासतीत्यभि ऽ दासति। अधरंगमय। गमयातमः। तमइति
तमः। इन्द्रायत्वा। त्वाविमृधे। विमृधएषः। विमृधइति वि ऽ मृधे। ४। वाचस्पतिं। पतिंविश्वकर्माणं। वि
श्वकर्माणमूतये। विश्वकर्माणमिति विश्व ऽ कर्माणं। ऊतयेमनोजुवं। मनोजुवंवाजे। मनोजुवमिति
मनः। जुवं। वाजे। अद्य। अद्याहुवेम। हुवेमेतिहुवेम। सनः। नोविश्वानि। विश्वानिहवनानि। हवना
निजोषत्। जोषद्विश्वशंभूः। विश्वशंभूरवसे। विश्वशंभूरिति विश्व ऽ शंभूः। अवसेसाधुकर्मा। साधु
कर्मेतिसाधु ऽ कर्मा। इन्द्रायत्वा। त्वाविश्वकर्मणे। विश्वकर्मणएषः। विश्वकर्मणइति विश्व ऽ कर्मणे।
एषते। तेयोनिः। योनिरिंद्राय। इन्द्रायत्वा। त्वाविश्वकर्मणे। विश्वकर्मणइति विश्व ऽ कर्मणे॥४५॥६०॥
विश्वकर्मन्हविषा। विश्वकर्मन्निति विश्व ऽ कर्मन्। हविषावावृधानः। वावृधानःस्वयं। वावृधानइ
तिववृधानः। स्वयंयजस्व। यजस्वपृथिवीं। पृथिवीमुत। उतद्यां। द्यामिति द्याम्। मुषंत्वन्ये। अन्ये

॥५३॥

१०५

अमित्रः। अमित्रः सपत्नाः। सपत्ना दूरा। सपत्ना इति सऽपत्नाः। दूरास्माकं। अस्माकं मघवा। मघवा
सूरिः। मघवेति मघऽवा। सूरिरस्तु। अस्त्वित्यस्तु॥१॥ विश्वकर्मन्हविषा। विश्वकर्मन्निति विश्वऽक
र्मन्। हविषा वर्द्धनेन। वर्धनेन त्रातारं। त्रातारमिन्द्रं। इन्द्रमकृणोः। अकृणोरबुध्यं। अबुध्यमित्यबु
ध्यं। तस्मै विशः। विशः सं। समनमन्त। अनमन्त पूर्वीः। पूर्वीरयं। अयमुग्रः। उग्रो विहव्यः। विहव्यो
यथा। विहव्य इति विऽहव्यः। यथासत्। असदित्यसत्॥२॥ अग्नये त्वा। त्वा गायत्रछंदसं। गायत्र
छंदसं गृह्णामि। गायत्रछंदसमिति गायत्रऽछंदसं। गृह्णामीन्द्राय। इन्द्राय त्रिष्टुप्छंदसं। त्रिष्टुप्छं
दसं विश्वेभ्यः। त्रिष्टुप्छंदसमिति त्रिष्टुप्ऽछंदसं। विश्वेभ्यो देवेभ्यः। देवेभ्यो जगछंदसं। जगछं
दसमनुष्टुप्। जगछंदसमिति जगत्ऽछंदसं। अनुष्टुप्ते। अनुष्टुबित्यनुऽस्तुप्। तेऽभिगरः।
अभिगरो व्रेशीनां। अभिगर इत्यभिऽगरः। व्रेशीनां त्वा। त्वा पत्मन्। पत्मन्ना धूनोमि। आ धूनो
मि। धूनोमि कुकूननानां। कुकूननानां भंदनानां। भंदनानां मध्यंतमानां। मध्यंतमान्ना

॥५३॥

४शुक्रं।मध्वंतमाना।मितिमधुऽअन्तमानं।शुक्रंत्वा।त्वाशुक्रे।शुक्रआ।आधूनोमि।आधूनोमि।धूनोम्यन्हः।
अन्हो।रूपे।रूपेसूर्यस्य।सूर्यस्यरश्मिषु।रश्मिषुककुहं।।२।।ककुहंरूपं।रूपंवृषभस्य।वृषभस्यरोचते।रो
चतेबृहत्।बृहत्सोमः।सोमःसोमस्य।सोमस्यपुरोगाः।पुरोगाःशुक्रः।पुरोगाइतिपुरः।गाः।शुक्रःशु
क्रस्य।शुक्रस्यपुरोगाः।पुरोगायत्।पुरोगाइतिपुरः।गाः।यत्ते।तेसोम।सोमादाभ्यं।अदाभ्यंनाम।
नामजागृवि।जागृवितस्मै।तस्मैत्वा।त्वागृह्णामि।गृह्णामितस्मै।तस्मैते।तेसोम।सोमसोमाय।सो
मायस्वाहा।स्वाहोशिक।।३।।उशिकत्वं।त्वंदेव।देवसोम।सोमाग्नेः।अग्नेःप्रियं।प्रियंपाथः।पाथो
पि।अपीहि।इहिवशी।वशीन्द्रस्य।इन्द्रस्यात्त्वंरपा।अस्मत्सखात्वं।अस्मत्सखेत्यस्मत्।सखा।त्वंदेव।
देवसोम।सोमविश्वेषां।विश्वेषांदेवानां।देवानांप्रियं।प्रियंपाथः।पाथोपि।अपीहि।इहीतीहि।।५।। ५१
इतिक्रमपाठेऽष्टमोध्यायः।।८७।।७।प्राणायमे।मेवर्चोदाः।वर्चोदावर्चसे।वर्चसेपवस्व।पव
स्वव्यानाय।व्याना।योदानाय।उदानायवाचे।उदानायेत्युत्।आनाय।वाचेक्रतूदक्षाभ्यां।।१।
क्रतूदक्षाभ्यां।श्रोत्राय।श्रोत्रायचक्षुर्भ्यां।चक्षुर्भ्यांमे।चक्षुर्भ्यामितिचक्षुःऽभ्यां।मेवर्चोदसौ।

+ व्यानायेतिविऽआनाय।
२

२ वर्चोदाइतिवर्चःऽदाः।

वर्चोदसौवर्चसे। वर्चोदसाऽइतिवर्चःऽदसौ। वर्चसेपवेथां। पवेथामात्मने॥२॥ आत्मनऽऊर्जसे। ऊर्जसऽआ
युषे। आयुषेविश्वाभ्यः। विश्वाभ्योमे। मेप्रजाभ्यः। प्रजाभ्योवर्चसौ। प्रजाभ्यइतिप्रऽजाभ्यः। वर्चोदसौवर्चसे।
॥५४५ वर्चोदसाऽइतिवर्चःऽदसौ। वर्चसेपवेथां। पवेथांकः॥३॥ कोसि। असिकतमः। कतमःकस्य। कस्यकः।
कोनाम। नामासि। असियस्य। यस्यते। तेनाम। नामामन्महि। अमन्महियं। यंत्वा। त्वासोमेन। सो
मेनातीतृपाम। अतीतृपामेत्यतीतृपाम॥४॥ रूपेणवः। वोरूपं। रूपमभि। अभ्यागां। आगां। आगां।
तुथः। तुथोवः। वोविश्ववेदाः। विश्ववेदावि। विश्ववेदाइतिविश्वऽवेदाः। विभजतु। भजत्वृतस्य। ऋ
तस्यपथा। पथाप्र। प्रेत। इतचंद्रदक्षिणाः। चंद्रदक्षिणावि। चंद्रदक्षिणाइतिचंद्रऽदक्षिणाः॥५॥ वि
स्वः। स्वःपश्य। स्वरितिस्वः। पश्यवि। व्यंतरिक्षं। अंतरिक्षंयतस्व। यतस्वसदस्यैः। सदस्यैर्ब्राह्मणम्।
ब्राह्मणमद्य। अद्यविदेय। विदेयपितृमंतं। पितृमंतंपैतृमत्यं। पितृमंतमितिपितृऽमंतं। पैतृम ॥५४॥
त्यमृषिं। पैतृमत्यमितिपैतृऽमत्यं। ऋषिमार्षेयं। आर्षेयंसुधातुदक्षिणं। सुधातुदक्षिणमस्म
द्राता। सुधातुदक्षिणमितिसुधातुऽदक्षिणं। अस्मद्रातादेवत्रा। अस्मद्रातेत्यस्मत्ऽराता। देवत्रा

॥६॥

गंधं। देवत्रेतिदेवऽत्रा। गंधंप्रदातारं। प्रदातारमाविश। प्रदातारमितिप्रऽदातारं। आविश॥ विशाग्नये।
अग्नयेत्वा। त्वामह्यं। मह्यंवरुणः। वरुणोददातु। ददातुसः। सोमृतत्वं। अमृतत्वमश्यात्। अमृतत्व
मित्यमृतऽत्वं। अश्यादायुः॥७॥ आयुर्दात्रे। दात्रएधि। एधिमयः। मयोमह्यं। मह्यंप्रतिग्रहीतत्रे।
प्रतिग्रहीत्रेरुद्राय। प्रतिग्रहीत्रइतिप्रतिऽग्रहीत्रे। रुद्रायप्राणः। प्राणोबृहस्पतये। बृहस्पतयेत्वक्।
त्वग्यमाय। यमायवयः। वयोमयः। मयोमह्यं। मह्यंप्रतिग्रहीत्रे। प्रतिग्रहीत्रेकः। प्रतिग्रहीत्रइतिप्र
ति। ग्रहीत्रे॥८॥ कोदात्। अदात्कस्मै। कस्मैकामः। कामःकामाय। कामायकामः। कामोदाता। दाता
कामः। कामःप्रतिग्रहीता। प्रतिग्रहीताकामं। प्रतिग्रहीतेतिप्रति। ग्रहीता। कामैतत्। एतत्ते। तेतव।
तवकाम। कामसता। सताभुनजामहे। भुनजामहइतिभुनजामहे॥१॥ समिंद्र। इंद्रणः। णोमनसा।
मनसानेषि। नेषिगोभिः। गोभिःसं। संसूरिभिः। सूरिभिर्मघवन्। सूरिभिरितिसूरिऽभिः। मघवन्त्सं।
मघवन्नितिमघऽवन्। संस्वस्त्या। स्वस्त्येतिस्वस्त्या॥ संब्रह्मणा। ब्रह्मणादेवकृतं। देवकृतंयत्। देव

॥५५॥ कर्तुमितिदेवः कर्त्ता। यदस्ति। अस्ति सं। सं देवानां। देवानाꣳ सुमतौ। सुमतौ यज्ञियानां। सुमताइतिसुऽम
तौ। यज्ञियानामिति यज्ञियानां॥१०॥ धातारातिः। रातिः सविता। सवितेदं। इदं जुषंतां। जुषंतां प्रजापतिः।
प्रजापतिर्निधिपाः। प्रजापतिरिति प्रजा। पतिः। निधिपा देवः। निधिपाइति निधिऽपाः। देवो अग्निः।
अग्निरित्यग्निः। त्वष्टा विष्णुः। विष्णुः प्रजया। प्रजया संरराणः। प्रजयेति प्रऽजया। संरराणो यजमानाय।
संरराणइति सं। रराणः। यजमानाय द्रविणं। द्रविणं दधातु। दधात्विति दधातु॥११॥ सुगा वः। सुगेति
सु। गा। वो देवाः। देवाः सदना। सदना अकर्म। अकर्म य। य आजग्म। आजग्मेदं। आजग्मेत्याऽजग्म। इ ज
दं सवनं। सवनं जुषाणाः। जुषाणाइति जुषाणाः। भरमाणा वहमानाः। वहमाना हवीꣳषि। हवीꣳ
ष्यस्मे। अस्मे धत्त। धत्त वसवः। वसवो वसूनि। वसूनीति वसूनि॥१२॥ यां आवहः। आवहः। अवह
उशतः। उशतो देव। देव देवान्। देवाꣳस्तान्। तान् प्रेरय। ईरय स्वे। स्वे अग्ने। अग्ने सधस्थे। सधस्थ
इति सधऽस्थे। जक्षिवाꣳसः पपिवाꣳसः। जक्षिवाꣳसइति जक्षिऽवाꣳसः। पपिवाꣳसः स्वश्च। प ॥५५॥

३ अरस्यस्मे।

सहसूक्तवाकुरति सहऽसूक्तवाकः। सर्ववीरः जुषं। सर्ववीर इति सर्वऽवीरः ८॥

श्री ३०।

११०

पृथाऽसद्इतिपृथुऽसदः। सदः विश्वे। विश्वेसुं। असुं घर्मं। घर्मं स्वर्वतः। स्वरातिष्ठंत। आतिष्ठंत। तिष्ठंतामनु।
२य आन्विस्यंतु॥१२॥ वयोहि। हि त्वा। त्वा प्रयति। प्रयति यज्ञे। प्रयतीति प्रऽयति। यज्ञे। अस्मिन्न्। अस्मिन्नग्ने। अग्ने
होतारं। होतारमवृणीमहि। अवृणीमहीह। इहेतीह। ऋधगयाः। ऋधगया ऋधक्। ऋधगुत। उताशमिष्ठाः।
४ अशमिष्ठाः प्रजानन्न्। प्रजानन्यज्ञं। प्रजानन्निति प्रऽजानन्। यज्ञमुप। उपयाहि। याहि विद्वान्। विद्वानिति
विद्वान्॥१॥ यज्ञयज्ञं। यज्ञं गच्छ। गच्छ यज्ञपतिं। यज्ञपतिं स्वां। यज्ञपतिमिति यज्ञऽपतिं। स्वां योनिं। यो
निं गच्छ। गच्छ स्वाहा। स्वाहैषः। एष ते। ते यज्ञः। यज्ञो यज्ञपते। यज्ञपते सहसूक्तवाकः। यज्ञपत इति यज्ञ
पते। सहसूक्तवाकः सर्ववीरः। सर्ववीरस्तं। तं जुषस्व। जुषस्व स्वाहा। स्वाहेति स्वाहा॥१७॥ उरुंहि। हि राजा। राजा व
रुणः। वरुणश्चकार। चकार सूर्याय। सूर्याय पंथां। पंथामन्वेतवै। अन्वेतवा उ। अन्वेतवा इत्यनुऽएतवे।
उ इत्यु। अपदे पादा। पादा प्रतिधातवे। प्रतिधातवेकः। प्रतिधातवइतिप्रतिऽधातवे। अकरुत। उताप व
क्ता। अपवक्ता हृदयाविधः। अपवक्तेत्यपऽवक्ता। हृदयाविधश्चित्। हृदयाविध इति हृदयऽविधः। चि
दितिचित्। नमो वरुणाय। वरुणायाभिष्ठितः। अभिष्ठितो वरुणस्य। अभिष्ठित इत्यभिऽस्थितः।

॥५६॥ वरुणस्य पात्राः॥ पात्रा इति पात्राः॥२५॥ अग्नेरनीकं। अनीकमपः। अप आविवेश। आ विवेश। विवेशापां। १११
अपांनपात्। नपात्प्रतिरक्षन्। प्रतिरक्षन्नसुर्यं। प्रतिरक्षन्निति प्रति ऽ रक्षन्। असुर्यमित्यसुर्यं। दमेदमे
समिधं। दमेदम इति दमेदमे। समिधं यक्षि। समिधमिति सं ऽ इधं। यक्ष्यग्ने। अग्ने प्रति। प्रति ते। ते जिह्वा
जिह्वा घृतं। घृतमुत्। उच्चरण्यत्। चरण्यत्स्वाहा। स्वाहेति स्वाहा॥२८॥ समुद्रे ते। ते हृदयं। हृदयमप्सु।
अप्स्वंतः। अप्स्वित्यप्ऽसु। अंतः सम्। अंतरित्यंतः। संत्वा। त्वा विशंतु। विशंत्वोषधीः। ओषधीरुत। उतापः।
आप इत्यापः। यज्ञस्य त्वा। त्वा यज्ञपते। यज्ञपते सूक्तोक्तौ। यज्ञपत इति यज्ञ। पते। सूक्तोक्तौ नमोवाके। सू
क्तोक्ताविति सूक्त ऽ उक्तौ। नमोवाके विधेम। नमोवाक इति नमः ऽ वाके। विधेम यत्। यत्स्वाहा। स्वाहेति
स्वाहा॥१॥ देवीरापः। आप एषः। एष वः। वो गर्भः। गर्भस्तं। तं सुप्रीतं। सुप्रीतं सुभृतं। सुप्रीतमिति सु ऽ
प्रीतं। सुभृतं बिभृत। बिभृतेति बिभृत। देव सोम। सोमैषः। एष ते। ते लोकः। लोकः परि। परिंच। च वक्षि। ॥५६॥
वक्षि शं। शंच। चवक्षि। वक्षीति वक्षि। देवानां ऽ समित्। समिदसि। समिदिति सं ऽ इत्। असीत्यसि॥१६॥ ७

२ सुभृतमिति सु ऽ भृतं।

११२

एजंतुदशमास्यः।दशमास्योगर्भः।दशमास्यइतिदशऽमास्यः।गर्भोजरायुणा।जरायुणासह।सहेतिसह।
यथायं।अयंवायुः।वायुरेजति।एजतियथा।यथासमुद्रः।समुद्रएजति।एजत्येव।एवायं।अयंदशमास्यः।
दशमास्योअस्रत्।दशमास्यइतिदशऽमास्यः।अस्रज्जरायुणा।जरायुणासह।सहेतिसह॥२१॥यस्यैते
तेयज्ञियः।यज्ञियोगर्भः।गर्भोयस्याः।यस्यायोनिः।योनिर्हिरण्ययी।हिरण्ययीतिहिरण्ययी।अंगान्य
ह्रुता।अह्रुतायस्य।यस्यतं।तंमात्रा।मात्रासं।संमजीगमं।अजीगमं स्वाहा।स्वाहेतिस्वाहा॥२०॥पुरु
दस्मो।विषुरूपः।पुरुदस्मइतिपुरुऽदस्मः।विषुरूपइंदुः।विषुरूपइतिविषुऽरूपः।इंदुरंतः।अंतर्महिमानं।
महिमानंना।आनंजधीरः।धीरइतिधीरः।एकपदीद्विपदीं।एकपदीमित्येकऽपदीं।द्विपदींत्रिपदीं।द्वि
पदीमितिद्विऽपदीम्।त्रिपदींचतुष्पदीं।त्रिपदीमितित्रिऽपदीं।चतुष्पदीमष्टापदीं।चतुःपदीमिति
चतुः।पदीं।अष्टापदींभुवना।अष्टापदीमित्यष्टऽपदीं।भुवनानु।अनुप्रथंतां।प्रथंतां स्वाहा।स्वाहेति
स्वाहा॥१॥मरुतोयस्य।यस्यहि।हिक्षये।क्षयेपाथ।पाथादिवः।दिवो।विमहसः।विमहसइतिविऽम
हसः।सःसुगोपातमः।सुगोपातमोजनः।सुगोपातमइतिसुऽगोपातमः।जनइतिजनः॥२२॥म

नेमा
५

प. ६

॥५८॥

हीद्यौः। द्यौः पृथिवी। पृ२थिवी च। च नः। न इमम्। इमं यज्ञं। यज्ञं मिमिक्षतां। मिमिक्षतामिति मिमि
क्षतां। पिपृतां नः। नो भरीमभिः। भरीमभिरिति भरीमऽभिः॥२३॥ आ जिघ्र। जिघ्र कलशं। कलशं म
हि। मह्या त्वा। आ त्वा। त्वा विशंतु। विशं त्विंदवः। इंदव इतींदवः। पुनरूर्जा। ऊर्जा नि। निवर्तस्व। वर्तस्व
सा। सा नः। नः सहस्रम्। सहस्रं धुक्ष्व। धुक्ष्वोरुधारा। उरुधारा पयस्वती। उरुधारेत्युरुऽधारा। प
यस्वती पुनः। पुनर्मा। मा विशतात्। आविशतात्। विशतात्रयिः। रयिरिति रयिः॥२४॥ हव्ये काम्ये।
काम्य इडे। इडे रन्ते। रंते चंद्रे। चंद्रे ज्योते। ज्योते दिते। अदिते सरस्वति। सरस्वति महि। महि विश्रुति। वि
श्रुतीति विऽश्रुति। एता ते। ते अघ्न्ये। अघ्न्ये नामानि। नामानि देवेषु। देवेषु मा। मा सुकृतं। सुकृतं ब्रूतात्।
सुकृतमिति सुऽकृतं। ब्रूतादिति ब्रूतात्॥२५॥ इह रतिः। रतिरिह। इह रमध्वं। रमध्वमिह। इह धृतिः। धृ
तिरिह। इह स्वधृतिः। स्वधृतिः स्वाहा। स्वधृतिरिति स्वऽधृतिः। स्वाहेति स्वाहा। उप सृजं धरुणं। उप सृज
न्नित्युपऽसृजन्। धरुणं मात्रे। मात्रे धरुणः। धरुणो मातरं। मातरं धयन्। धयन्रायः। रायस्पोषं।

॥५८॥

पोषमस्मासु। अस्मासु दीधरत्। धीरे धेत्स्वाहा। स्वाहेति स्वाहा॥२६॥ उप्यस्मृ ॐ अगन्मज्योतिः। ज्योतिर
मृताः। अमृता अभूम। अभूम दिवं। दिवं पृथिव्याः। पृथिव्या अधि। अध्यारुहम। आरुहाम। अरुहामेत्या
रुहाम। अविदामदेवान्। देवान्त्स्वः। स्वर्ज्योतिः। ज्योतिरितिज्योतिः॥२७॥ युवंतं। तमिंद्रापर्वता। ईंद्रापर्व
ता पुरोयुधा। पुरोयुधा यः। पुरोयुधेति पुरः। युधा। यो नः। यो नः पृतन्यात्। पृतन्यादप। अपतंतं। तं त
मित्। तंतमितितम्। तम्। इद्धतं। हतं वज्रेण। वज्रेण तंतं। तंतमित्। तंतमितितंतं। इद्धतं। हतमिति
हतं। दूरे चत्ताय। चत्ताय छन्त्सत्। छन्त्सग्दहनं। गहनं यत्। यदिनक्षत्। इनक्षदस्माकं। अस्माकं श
त्रून्। शत्रून्परि। परि शूर। शूर विश्वतः। विश्वतो दर्मा। दर्मा दर्षीष्ट। दर्षीष्ट विश्वतः। विश्वत इति विश्व
तः॥२८॥ परमेष्ठ्यभिधीतः। परमेस्थीति परमेस्थी। अभितः धी प्रजापतिः। अभिधीत इत्यभिऽधी
तः। प्रजापतिर्वाचि। प्रजापतिरिति प्रजाऽपतिः। वाचि व्याहृतायाम्। व्याहृतायामंधः। व्याहृताया
मिति विऽआहृतायां। अंधो अच्छेतः। अच्छेतस्सविता। अच्छेत इत्यच्छ। इतः। सविता सन्यां। सन्यां

विश्वकर्मा। विश्वकर्मा दीक्षायां। विश्वकर्मेति विश्वऽकर्मा। दीक्षायां। पूषा। पूषा सोमक्रयण्यां। सोमक्रयण्यामि-
न्द्रः। सोमक्रयण्यामिति सोमऽक्रयण्यां॥२९॥ इन्द्रश्च। च मरुतः। मरुतश्च। च क्रयाय। क्रयायोपोत्थितः। उपोत्थि-
तोऽसुरः उपोत्थित इत्युपऽउत्थितः। असुरः पण्यमानः। पण्यमानो मित्रः। मित्रः क्रीतः। क्रीतो विष्णुः॥३०॥ विष्णुः
शिपिविष्टः। शिपिविष्ट ऊरौ। ऊरावासन्नः। आसन्नो विष्णुः। आसन्न इत्याऽसन्नः। विष्णुर्नरधिषः। न-
रधिषः प्रोह्यमाणः। प्रोह्यमाणः सोमः। प्रोह्यमाण इति प्रऽउह्यमानः। सोम आगतः। आगतो व-
रुणः। आगत इत्याऽगतः। वरुण आसंद्याम्। आसंद्यामासन्नः। आसंद्यामित्याऽसंद्याम्। आसन्नोऽ-
ग्निः। आसन्न इत्याऽसन्नः॥३१॥ अग्निराग्नीध्रे। आग्नीध्र इंद्रः। इंद्रो हविर्धाने। हविर्धानेऽथर्वा। हविर्धा-
न इति हविः।धाने। अथर्वोपावह्रियमाणः। उपाव-ह्रिमाणो विश्वे। उपावह्रिमाण इत्युपऽआवह्रि-
यमाणः। विश्वेदेवाः। देवा अंशुषु। अंशुषु न्युप्यमानेषु। न्युप्यमानेषु विष्णुः। न्युप्यमानेष्विति निऽ-
उप्यमानेषु॥३२॥ विष्णुराप्रीतपाः। आप्रीतपा आप्याय्यमानः। आप्रीतपा इत्याऽप्रीतऽपाः। आ-
प्याय्यमानो यमः। आप्याय्यमान इत्याऽप्याय्यमानः। यमः सूयमानः। सूयमानो विष्णुः। विष्णुः संभ्रि-

यमाणः। संभ्रियमाणोवायुः। संभ्रियमाणइतिसं। भ्रियमाणः। वायुःपूयमानः। पूयमानोवायुः। शुक्रः।
शुक्रःपूतः। पूतश्शुक्रः। शुक्रःक्षीरश्रीः। क्षीरश्रीर्मंथी। क्षीरश्रीरितिक्षीरऽश्रीः। मंथीसक्तुश्रीः। सक्तुश्रीर्विश्वे।
सक्तुश्रीरितिसक्तुऽश्रीः। विश्वेदेवाः। देवाश्चमसेषु। चमसेषून्नीतः। उंन्नीतोसुः। उंन्नीतइत्युत्ऽनीतः। असुर्होमाय।
होमायोद्यतः। उद्यतोरुद्रः। उद्यतइत्युत्ऽयतः। ॥२३॥ रुद्रोहूयमानः। हूयमानोवातः। वातो
ऽभ्यावृत्तः। अभ्यावृत्तोनृचक्षाः। अभ्यावृत्तइत्यभिऽआऽवृत्तः। नृचक्षाःप्रतिख्यातः। नृचक्षाइतिनृऽच
क्षाः। प्रतिख्यातोभक्षः। प्रतिख्यातइतिप्रतिऽख्यातः। भक्षःपीतः। पीतःपितरः। पितरोस्स्वनाराशं
साः। नाराशंसाःसाद्यमानः। साद्यमानःसिंधुः। सिंधुरवभृथाय। अवभृथायोद्यतः। अवभृथायेत्यव
ऽभृथाय। उद्यतःसमुद्रः। उद्यतइत्युत्ऽयतः। समुद्रोभ्यवह्रियमाणः। अभ्यवह्रियमाणःसलिलः।
अभ्यवह्रियमाणइत्यभिऽअवह्रियमाणः। सलिलःप्रप्लुतः। प्रप्लुतइतिप्रऽप्लुतः। ॥२४॥ ययोरोजसा।
ओजसास्कभिता। स्कभितारजांसि। रजांसिवीर्येभिः। वीर्येभिर्वीरतमा। वीरतमाशविष्ठा। वीर

॥५१॥ नमेतिवीरऽ नमा। शा विश्वेतिश्रा विश्वा। याप्रत्येतो। पत्येतेऽअप्रतीता। प्रत्येतेइतिपत्येते। अप्रतीता सहोभिः। अप्रतीतेत्यप्रतिऽइता। सहोभिर्विष्णू। सहोभिरितिसहः। भिः। विष्णू अगन्। विष्णुरिति विष्णुऽ अगन्वरुणा। वरुणापूर्वहूतौ। पूर्वहूताइतिपूर्वऽहूतौ॥ ३५॥ देवा दिवं। दिवमगन्। आगन्यज्ञः। यज्ञःस्त तः। ततोमा। माद्रविणं। द्रविणमष्टु। अष्टुमनुष्यान्। मनुष्यानंतरिक्षं। अंतरिक्षंपितॄन्। पितॄन्पृथि वीं। पृथिवींयं। यंकं। कंच। चलोकं। लोकमगन्। आगन्यज्ञः। यज्ञस्ततः। ततोमे। मेभद्रं। भद्रमभूत्। अ भूदित्यभूत्॥ ३५॥ छ॥ इतियजुर्वेदक्रमपाठेनवमोध्यायः॥ छ छ॥ ॐ॥ देवसवितः। सुवितःप्र। सवितरितिसवितः। प्रसुव। सुवयज्ञं। यज्ञंप्र। प्रसुव। सुवेमं। इमंभगाय। भगायेतिभगाय। दिव्योगं धर्वः। गंधर्वः केतपाः। केतपाः केतं। केतपाइतिकेतऽपाः। केतंनः। नः पुनातु। पुनातुवाचः। वाचस्प तिः। पतिर्नः। नोअद्य। अद्यवाजं। वाजं स्वदतु। स्वदत्वितिस्वदतु॥ १॥ ध्रुवसदंत्वा। ध्रुवसदमि तिध्रुवऽसदं। त्वानृषदं। नृषदंमनःसदं। नृसदमितिनृऽसदं। मनःसदमुपयामगृहीतः। ॥५१॥

मनःसदमितिमनःसदं। उपयामगृहीतोसि। उपयामगृहीतइत्युपयामऽगृहीतः। असीन्द्राय। इंद्रा
यत्वा। त्वाजुष्टम्। जुष्टंगृह्णामि। गृह्णाम्येषः। एषते। तेयोनिः। योनिरिन्द्राय। इंद्रायत्वा। त्वाजुष्टतमं।
जुष्टतममप्सुषदं। जुष्टतममितिजुष्टऽतमं॥२॥ अप्सुषदंत्वा। अप्सुसदमित्यप्सुऽसदं। त्वाघृतस
दं। घृतसदंव्योमसदं। घृतसदमितिघृतऽसदं। व्योमसदंपृथिवीषदं। व्योमसदमितिव्योमऽसदं। पृ
थिवीषदमंतरिक्षसदं। पृथिवीसदमितिपृथिविऽसदं। अंतरिक्षसदंदिविषदं। अंतरिक्षसमित्यं
तरिक्षऽसदं। दिविषदंदेवसदं। दिविसदमितिदिविऽसदं। देवसदंनाकसदं। देवसदमितिदेवऽस
दं। नाकसदमितिनाकऽसदं। ।३।७। अपांरसं। रसमुद्वयसं। उद्वयसंसूर्ये। उद्वयसमित्युत्ऽवय
सं। सूर्येसन्तं। सन्तंसमाहितं। समाहितमितिसं। आहितं। अपांरसस्य। रसस्ययः। योरसः। रस
स्तं। तंवः। वोगृह्णामि। गृह्णाम्युत्तमं। उत्तममित्युत्ऽतमं॥४॥ ग्रहाऊर्जाहुतयः। ऊर्जाहुतयोव्यंतः। ऊर्जाहु
तयइत्यूर्जाऽआहुतयः। व्यंतोविप्राय। विप्रायमंतिं। मतिमितिमतिं। तेषांविशिप्रियाणां। विशि

॥६०॥ प्रियाणांवः। विप्रि। प्रियाणामितिविऽप्रियाणां। वोहं। अहमिषं। इषमूर्जं। ऊर्जंसं। समग्रभं। ११२
अग्रभमित्यग्रभं॥५॥ संपृचस्थ। संपृच इतिसं। पृचः। स्थसं। संमा। माभद्रेण। भद्रेणपृंक्त। पृंक्त। विप
चः। विपृचस्थ। विपृच इतिविऽपृचः। स्थवि। विमा। मापापेन। पापेनपृंक्त। पृंक्तेतिपृंक्त॥६॥ इंद्रस्य
वज्रः। वज्रोसि। असिवाजसाः। वाजसास्त्वया। वाजसा इतिवाजऽसाः। त्वयायं। अयंवाजं। वाजंसेत्।
सेदितिसेत्। वाजस्यनु। नुप्रसवे। प्रसवेमातरं। प्रसव इतिप्रऽसवे। मातरंमही। महीमदितिं। अदिति
न्नाम। नामवचसा। वचसाकरामहे। करामह इतिकरामहे। यस्यामिदं। इदंविश्वं। विश्वंभुवनं। भुव
रु नमाविवेश। आविवेशतस्यां। आविवेशेत्याऽविवेश। तस्यान्नः। नोदेवः। देवःसविता। सविताधर्म।
धर्मसाविषक्। साविषगितिसाविषक्॥७॥ देवीरापः। आपोअपां। अपांनपात्। नपाद्यः। योवः। व
ऊर्मिः। ऊर्मिरप्रतूर्तिः। अप्रतूर्तिरितिप्रऽतूर्तिः। ककुन्मान्वाजसाः। ककुंमानितिककुत्। मान्। वाजसा ॥६०॥
स्तेन। वाजसा इतिवाजऽसाः। तेनायं। अयंवाजं। वाजंसेत्। सेदितिसेत्॥८॥ अश्वंतः। आसित्य

ॐ

त्यप्सु।अप्स्वंतरमृतं।अमृतमप्सु।अप्सुभेषं।अप्स्वित्यप्सु।भेषजमपां।अपामुत।उतप्रशस्तिभिः।प्रश
स्तिभिरितिप्रशस्तिऽभिः।अश्वाभवत।भवतवाजिनः।वाजिनइतिवाजिनः॥८॥वातोवा।वावः।वोम
नः।मनोवा।वागंधर्वाः।गंधर्वाः सप्तवींशतिः।सप्तवींशतिरितिसप्त।ऽविंशतिः।तेअग्रे।अग्रेश्वम्
अश्वमयुंजन्।अयुंजंस्ते।तेअस्मिन्।अस्मिंजवं।जवमादधुः।आदधुः।अदधुरित्यदधुः॥१०॥
वातरांभव।वातरांहाइतिवातऽरांहाः।भववाजिन्।वाजिन्युज्यमानः।युज्यमानइंद्रस्येव।इंद्रस्येव
दक्षिणः।इंद्रस्येवेतींद्रस्यऽइव।दक्षिणःश्रिया।श्रियैधि।एधीत्येधी।युंजंतुत्वा।त्वामरुतः।मरुतो
विश्ववेदसः।विश्ववेदसआते।विश्ववेदसइतिविश्वऽवेदसः।आते।तेत्वष्टा।त्वष्टापत्सु।पत्सुज
वं।पत्स्वितिपत्ऽसु।जवंदधातु।दधात्वितिनिदधातु॥११॥जवोयः।यस्ते।तेवाजिन्।वाजिन्[illegible]
निहितः।निहितोगुहा।निहितइतिनिऽहितः।गुहायः।यःश्येने।श्येनेपरीत्तः।परीत्तोअचरत्।प
रीत्तइतिपरिऽइत्तः।अचरच्च।चवाते।वातइतिवाते।तेननः।नोवाजिन्।वाजिन्बलवान्।बलवान्ब

२२०

लेन। बलदानिति बलऽदान्। बलेन वाजिजित्। वाजजिच्च। वाजजिदिति वाजऽजित्। चैधि। एधि समने।
॥६१॥ समने च। च पारयिष्णुः। पारयिष्णुरिति पारयिष्णुः।१२। वाजिनो वाजजितः। वाजजितो वाजं। वाज
जित इति वाजऽजितः। वाजं सरिष्यन्तः। सरिष्यन्तो बृहस्पतेः। बृहस्पतेर्भागं। भागमव। अव जिघ्र
त। जिघ्रतेति जिघ्रत।२३। देवस्य वयं। वयं सवितुः। सवितुः सवे। सवे सत्यसवसः। सत्यसवसो
बृहस्पतेः। सत्यसवस इति सत्यऽसवसः। बृहस्पतेरुत्तमं। उत्तमं नाकं। उत्तममित्युत्ऽतमं। नाकं
म। रुहेम। रुहेमैंद्रस्य। इंद्रस्योत्तमं। उत्तमं नाकं। उत्तममित्युत्ऽतमं। नाकं रुहेम। रुहेमारुहाम। आरुहा
मु बृहस्पते। बृहस्पते वाजं। वाजं जय। जय बृहस्पतये। बृहस्पतये वाचं। वाचं वदत। वदत बृहस्पतिं। बृ
हस्पतिं वाजं। वाजं जापयत। जापयतेंद्र।१४। इंद्र वाजं। वाजं जयत। जयतेंद्राय। इंद्राय वाचं। वाचं वदत। ॥६१॥
वदतेंद्रं। इंद्रं वाजं। वाजं जापयत। जापयतैषा। एषा वः। वः सा। सा सत्या। सत्या संवाक्। संवागभू
त्। संवागिति सम्ऽवाक्। अभूद्यया। यया बृहस्पतिं। बृहस्पतिं वाजं। वाजमजीजपत। अजीज

पत्ताजीजपत।अजीजपत्तबृहस्पतिं।बृहस्पतिं वाजं।वाजं वनस्पतयः।वनस्पतयो वि।वि मुंच्यध्वं।मुंचे
ध्वं देवस्य।देवस्य वयं।वयं सवितुः।सवितुः सवे।सत्ये वै से सवसः।सत्यसवसो बृहस्पतेः।सत्यसवसइति
सत्य।सवः।बृहस्पतेर्वाजजिनः।वाजजितोवाजं।वाजजित इति वाज।जितः।वाजं जेष्म।जेष्म वाजिनः॥१७
वाजिनोवाजं।वाजं जयत।जयताध्वनः।अध्वनः स्कभ्नंतः।स्कभ्नंतो योजना।योजना मिमानाः।मिमाना
षां।काष्ठांगछत।गछतेतिगछत॥१८॥उतस्य।स्यवाजी।वाजी क्षिपणिं।क्षिपणिंतुरण्यति।तुरण्य
ति ग्रीवायां।ग्रीवायांबद्धः।बद्धोअपिकक्षे।अपिकक्षआसनि।अपिकक्षइत्यपिऽकक्षे।आसनीसा
सनि।क्रतुंदधिक्राः।दधिक्राअनु।दधिक्राइतिदधिऽक्राः।अनुसंतवीत्वत्।संतवीत्वत्पथां।संतवी
त्वदितिसं।तवीत्वत्।पथामंकांसि।अंकांस्यनु।अन्वापनीफणत्।आपनीफणदित्याऽपनीफणत्॥१९॥
उतस्म।स्मास्य।अस्यद्रवतः।द्रवतस्तुरण्यतः।तुरण्यतःपर्णं।पर्णंन।नवेः।वेरनु।अनुवाति।वातिप्रगर्धि
नः।प्रगर्धिनइतिप्रऽगर्धिनः।श्येनस्येवध्रजतः।श्येनस्येवेतिश्येनस्य।इव।ध्रजतोअंकसं।अंकसंपरि।

न

॥६२॥ परिदधिक्राव्णः।दधिक्राव्णःसह।दधिक्राव्णइतिदधिऽक्राव्णः।सहोर्जा।ऊर्जातरित्रतः।तरित्रत १२३
त्तितरित्रतः॥२०॥शंनः।नोभवंतु।भवंतुवाजिनः।वाजिनोहवेषु।हवेषुदेवताता।देवतातामितद्र
वः।देवतातेतिदेवऽताता।मितद्रवःस्वर्काः।मितद्रवइतिमितऽद्रवः।स्वर्काइतिसुऽअर्काः।जंभ
यंतोहिं।अहिंवृकं।वृकंरक्षांसि।रक्षांसिसनेमि।सनेम्यस्मत्।अस्मद्युयवन्।युयवन्नमीवाः।
अमीवाइत्यमीवाः॥२१॥तेनः।नोअर्वंतः।अर्वंतोहवनश्रुतः।हवनश्रुतोहवं।हवनश्रुतइतिहवन।
श्रुतः।हवंविश्वे।विश्वेशृण्वंतु।शृण्वंतुवाजिनः।वाजिनोमितद्रवः।मितद्रवइतिमितऽद्रवः।सह
सा स्रसामेधसाताइव।सहस्रसाइतिसहस्रऽसाः।मेधसाताइवत्मना।मेधसातेवेतिमेधसाता।
इव।त्मनामहः।महोये।येधनं।धनंसमिथेषु।समिथेषुजभ्रिरे।समिथेष्विति सं।इथेषु।ज
भ्रिरइतिजभ्रिरे॥२२॥वाजेवाजेवत।वाजेवाजइतिवाजे।वाजे।अवतवाजिनः।वाजिनोनः। ॥६२॥
नोधनेषु।धनेषुविप्राः।विप्राअमृताः।अमृताऋतज्ञाः।ऋतज्ञाइत्यृतऽज्ञाः।अस्यमध्वः।मध्वः

[illegible] [illegible]

पिबन्त। पिबन्तमादयध्वं। मादयध्वंतृप्ताः। तृप्तायोन्त। यातपथिभिः। पथिभिर्देवयानैः। देवया १२४

नैरितिदेवऽयानैः॥२३॥ आमा। मावाजस्य। वाजस्यप्रसवः। प्रसवोजगम्यात्। प्रसवइतिप्र

१५। सवः। जगम्यादेमे। इमे। इमेद्यावापृथिवी। द्यावापृथिवी विश्वरूपे। द्यावापृथिवीइति द्यावापृथिवी।

विश्वरूपेइति विश्वऽरूपे। आमा। मागन्तां। गन्तांपितरो। ते पितरामातरा। मातरायुवं। युवमामा। आमा

मासोमः। सोमो अमृतत्वाय। अमृतत्वायगम्यात्। अमृतत्वायेत्यमृतऽत्वाय। गम्यादिति गम्यात्। २४।

वाजिनो वाजजितः। वाजजितोवाजं। वाजजितइतिवाजऽजितः। वाजंससृवांसः। ससृवांस

सोबृहस्पतेः। बृहस्पतेर्भागं। भागमव। अवजिघ्रत। जिघ्रत निमृजानाः। निमृजानाइति निऽ

मृजानाः॥२५॥ आपयेस्वाहा। स्वाहास्वापये। स्वापयेपिजाय। स्वापयइति सुऽआपये। अपिजा

यक्रतवे। अपिजायेत्यपिऽजाय। क्रतवेवसवे। वसवेअहर्पतये। अहर्पतयेन्हे। अहःपतयइत्यहःऽ

पतये। अन्हेमुग्धाय। मुग्धायमुग्धाय। मुग्धायवैनंशिनाय। वैनंशिनाय विनंशिने। विनं

ससृवांसइति सम्ऽसृवांसः। विनंशिने आन्त्यायनाय।

२अधिपतय२० १५ ४ १८

आन्ताय ग्नें सोया । शिन्नइतिविऽनंशिनेँ आन्त्यायेनान्त्या । त्या । आँनाय । आन्त्यायभौवनाय । भौवनायभुवनस्य । भुवनस्यप १२५
तये । पतयेधिपतयेँ आयुः । अधिपतयइत्यधिऽपतये ॥२६॥ आयुर्यज्ञेन । यज्ञेनकल्पतां । कल्पतांप्रा
॥६३॥ णः । प्राणश्चक्षुः । चक्षुःश्रोत्रं । श्रोत्रंपृष्ठं । पृष्ठंयज्ञः । यज्ञोयज्ञेन । यज्ञेनकल्पतां । कल्पतांजाये । जायए
हि । एहि । इहिस्वः । स्वोरुहाव । स्वरितिस्वः । रोहावप्रजापतेः । प्रजापतेःप्रजाः । प्रजापतेरितिप्रजाऽ
पतेः । प्रजाअभूम । प्रजाइतिप्रऽजाः । अभूमस्वः । स्वर्देवाः । देवाअगन्म । अगन्मामृताः । अमृताअ
भूम । अभूमेत्यभूम ॥२७॥ अस्मेवः । अस्मेइत्यस्मे । वोअस्तु । अस्त्विंद्रियं । इंद्रियमस्मे । अस्मेनृम्णं ।
अस्मेइत्यस्मे । नृम्णमुत । उतक्रतुः । क्रतुरितिक्रतुः । अस्मेवर्चांसि । अस्मेइत्यस्मे । वर्चांसि ।
वर्चांसिसंतु । संतुवः । वइतिवः ॥२८॥ नमोमात्रे । मात्रेपृथिव्यै । पृथिव्याइयं । इयंते । तेराट् । रा
ड्यंता । यंतासि । असियमनः । यमनोध्रुवः । ध्रुवोसि । असिधरुणः । धरुणःकृष्यै । कृष्यैक्षेमाय । ॥६४॥
क्षेमायरय्यै । रय्यैपोषाय । पोषायेतिपोषाय ॥२९॥ वाजस्येमं । इमंप्रसवः । प्रसवःसुषुवे । प्रसव

२६

इति प्रऽसवः।सुषुवे अग्रे।सुसुव इति सुसुवे।अग्रे सोमं।सोमं राजानं।राजानमोषधीषु।ओषधी
ष्वप्सु।अप्स्वित्यप्ऽसु।ता अस्मभ्यं।अस्मभ्यं मधुमतीः।मधुमतीर्भवंतु।मधुमतीरिति मधुऽ
मतीः।भवंतु वयं।वयं राष्ट्रे।राष्ट्रे जागृयाम।जागृयाम पुरोहिताः।पुरोहिता इति पुरःऽहिताः।।पु
पुरोहिताइति पुरःऽहिताः।।२३।। वाजस्येदं।इदं प्रसवः।प्रसव आ।आ बभूव।प्रसव इति प्रऽसवः।आ
बभूव।बभूवेमा।इमा च।च विश्वा।विश्वा भुवनानि।भुवनानि सर्वतः।सर्वत इति सर्वऽतः।सवि।वि
राज्ञा।राज्ञा परि।परि याति।याति विद्वान्।विद्वान् रयिं।रयिं पुष्टिं।पुष्टिं वर्द्धयमानः।वर्द्धयमानो
अस्मे।अस्मे इत्यस्मे।।२४।। वाजस्येमं।इमं प्रसवः।प्रसवः शिश्रिये।प्रसव इति प्रऽसवः।शि
श्रिये दिवं।दिवमिमा।इमा च।च विश्वा।विश्वा भुवनानि।भुवनानि सम्राट्।सम्राडिति सं
राट्।अदित्सं तं दापयति।दापयति प्रजानन्।प्रजानन्त्सः।प्रजानन्निति प्रऽजानन्।स नः।
नो रयिं।रयिं सर्ववीरं।सर्ववीरं नि।सर्ववीरमिति सर्वऽवीरं।नि यच्छतु।यच्छत्विति यच्छतु।।२५

४

रत्न

।।६४।।

अग्ने अछ।अछावद।वदेह।इहनः।नःप्रति।प्रतिनः।नःसुमनाः।सुमनाभव।सुमनाइतिसुऽमनाः।
भवेतिभव।प्रनः।नोयछ।यछसहस्रजित्।सहस्रजित्त्वं।सहस्रजिदितिसहस्र।जित्त्वंहि।हि
धनदाः।धनदाअसि।धनदाइतिधनऽदाः।असीत्यसि।।३३।।सोमंराजानं।राजानमवसे।
अवसेग्निं।अग्निमन्वारभामहे।अन्वारभामहइत्यनुऽआरभामहे।आदित्यंविष्णुं।विष्णुं
सूर्यं।सूर्यंब्रह्माणं।ब्रह्माणंच।चबृहस्पतिं।बृहस्पतिमितिबृहस्पतिं।।३४।।प्रनः।नोयछ
तु।यछत्वर्यमा।अर्यमाप्र।प्रपूषा।पूषाप्र।प्रसरस्वती।सरस्वतीतिसरस्वती।प्रवाक।वाकदे
वी।देवीददातु।ददातुनः।नइतिनः।।३५।।अर्यमणंबृहस्पतिं।बृहस्पतिमिंद्रं।इंद्रंदानाय।
दानायचोदय।चोदयेतिचोदय।वातंविष्णुं।विष्णुंसरस्वतीं।सरस्वतींसवितारं।सवितारं
च।चवाजिनं।वाजिनमितिवाजिनं।।३६।।सरस्वत्यैवाचः।वाचोयन्तुः।यंतुर्यैं।तुर्यैंतुर्यैं।तुर्यैं
दधामि।दधामिबृहस्पतेः।बृहस्पतेष्ट्वा।त्वासाम्राज्येन।साम्राज्येनाभि।अभि।साम्राज्येनेतिसां

१२७

।।६४।।

६

१+ ॥ सिंचामी इंद्रस्य । इंद्रस्य त्वा । त्वा सांम्राज्येन । सांम्राज्येनाभि । सांम्राज्येनेति सांम्ऽराज्येन । अभि षिंचामि ।
राज्येन । अभि षिंचामि॑ सिंचामिति सिंचामि ॥ २७ ॥ अग्निरेकाक्षरेण । एकाक्षरेण प्राणं । एकाक्षरेणेत्ये
कऽअक्षरेण । प्राणमुत् । उदजयत् । अजयत्तं । तमुत् । उज्जेषं । जेषमश्विनौ । अश्विनौ द्व्यक्षरेण । द्व्य १२
क्षरेण द्विपदः । द्व्यक्षरेणेति द्विऽअक्षरेण । द्विपदो मनुष्यान् । द्विपद इति द्विऽपदः । मनुष्यानुत् ।
उज्जेषं दजयत्तां । अजयत्तां तान् । उज्जेषं । तानुत् । जेषं विष्णुः । विष्णुस्त्र्यक्षरेण । त्र्यक्षरे
णा त्रीन् । त्र्यक्षरेणेति त्रिऽअक्षरेण । त्रीनिमान् । इमाँल्लोकान् । लोकानुत् । उदजयत् । अ
य जैषान् । तानुत् । उज्जेषं । जेषं सोमः । सोमश्चतुरक्षरेण । चतुरक्षरेण चतुष्पदः । चतुरक्षरे
णेति चतुःऽअक्षरेण । चतुष्पदः पशून् । चतुःपद इति चतुःऽपदः । पशूनुत् । उदजयत् । अजे यु
त्रान् । तानुत् । उज्जेषं । जेषं पूषा । पूषा पंचाक्षरेण । पंचाक्षरेण पंचं । पंचाक्षरेणेति पंच । अक्षरेण
पंच ऋतून् । ऋतूनुत् । उदजयत् । अजयत्तान् । तानुत् । उज्जेषं । जेषं सविता । सविता षळक्षरेण । ष
ळक्षरेण षट् । षळक्षरेणेति षट्ऽअक्षरेण । अक्षरेण । षडृतून् । ऋतूनुत् । उदजयत् । अ

॥६५॥ जयत्तान्। तामुत्। उज्जेषं। जेषं मरुतः। मरुतः सप्ताक्षरेण। सप्ताक्षरेण १२८
सप्त। सप्ताक्षरेणेति सप्तऽअक्षरेण। सप्त ग्राम्यान्। ग्राम्यान्पशून्। पशूनुत्। उद
२५ जयन्। अजयंस्तान्। तानुत्। उज्जेषं। जेषं बृहस्पतिः। बृहस्पतिरष्टाक्षरेण। अष्टाक्ष
रेण गायत्रीं। अष्टाक्षरेणेत्यष्टऽअक्षरेण। गायत्रीमुत्। उदजयत्। अजयत्तां। तामुत्।
उज्जेषम्। जेषं मित्रः। ॥२८॥ मित्रो नवाक्षरेण। नवाक्षरेण त्रिवृतम्। नवाक्षरेणेति नवऽअक्ष
रेण। त्रिवृतं स्तोमं। त्रिवृतमिति त्रिऽवृतं। स्तोममुत्। उदजयत्। अजयत्तं। तमुत्। उज्जेषं। जेषं वरुणः।
वरुणो दशाक्षरेण। दशाक्षरेण विराजं। दशाक्षरेणेति दशऽअक्षरेण। विराजमुत्। विराजमिति विऽ
राजं। उदजयत्। अजयत्तां। तामुत्। उज्जेषं। जेषमिंद्रः। इंद्र एकादशाक्षरेण। एकादशाक्षरेण त्रिष्टुभं।
एकादशाक्षरेणेत्येकादशऽअक्षरेण। त्रिष्टुभमुत्। त्रिष्टुभमिति त्रिऽस्तुभं। उदजयत्। अजयत्तां।
तामुत्। उज्जेषं। जेषं विश्वे। विश्वे देवाः। देवा द्वादशाक्षरेण। द्वादशाक्षरेण जगतीं। द्वादशाक्षरेणेति ॥६५॥
द्वादशऽअक्षरेण। जगतीमुत्। उदजयन्। अजयंस्तां। तामुत्। उज्जेषं। जेषं वसवः। ॥७॥ वसवस्त्र

योदशाक्षरेण । त्रयोदशाक्षरेण त्रयोदशं । त्रयोदशाक्षरेणेति त्रयोदशऽअक्षरेण । त्रयोदशꣳ स्तोमं ।
त्रयोदशमिति त्रयःऽदशं । स्तोममुत् । उदजयन् । अजयꣳस्तं । तमुत् । उज्जेषं । जेषꣳ रुद्राः । रुद्राश्च
तुर्दशाक्षरेण । चतुर्दशाक्षरेण चतुर्दशं । चतुर्दशाक्षरेणेति चतुर्दशऽअक्षरेण । चतुर्दशꣳ
स्तोमं । चतुर्दशमिति चतुःऽदशं । स्तोममुत् । उदजयन् । अजयꣳस्तं । तमुत् । उज्जेषं । जेषमादि
त्याः । आदित्याः पञ्चदशाक्षरेण । पञ्चदशाक्षरेण पञ्चदशं । पञ्चदशाक्षरेणेति पञ्चदश
अक्षरेण । पञ्चदशꣳ स्तोमं । पञ्चदशमिति पञ्चऽदशं । स्तोममुत् । उदजयन् । अजयꣳस्तं । तमु
त् । उज्जेषं । जेषमदितिः । अदितिः षोडशाक्षरेण । षोडशाक्षरेण षोडशं । षोड
शाक्षरेणेति षोडशऽअक्षरेण । षोडशꣳ स्तोमं । स्तोममुत् । उदजयत् । अजयत्तं । तमुत् । उज्जे
षं । जेषं प्रजापतिः । प्रजापतिः सप्तदशाक्षरेण । प्रजापतिरिति प्रजाऽपतिः । सप्तदशाक्षरेण स
प्तदशं । सप्तदशाक्षरेणेति सप्तदशऽअक्षरेण । सप्तदशꣳ स्तोमं । सप्तदशमिति सप्तऽदशं ।
स्तोममुत् । उदजयत् । अजयत्तं । तमुत् । उज्जेषं । जेषमिति जेषं ॥ ७२ ॥ दशमोध्यायः ॥ ९८

१३१

॥५५॥ ऊंमृ॥ एषते। तेनिर्ऋते। निर्ऋते भागः। भागस्तं। तं जुषस्व। जुषस्व स्वाहा। स्वाहाग्निनेत्रेभ्यः।
अग्निनेत्रेभ्यो देवेभ्यः। अग्निनेत्रेभ्य इत्यग्निऽनेत्रेभ्यः। देवेभ्यः पुरःसभ्यः। पुरःसभ्यो य
मनेत्रेभ्यः। पुरःसभ्य इति पुरस्सत्।भ्यः। यमनेत्रेभ्यो दक्षिणासभ्यः। यमनेत्रेभ्य इति यमऽ
नेत्रेभ्यः। दक्षिणसभ्यो विश्वदेवनेत्रेभ्यः। दक्षिणसभ्य इति दक्षिणसत्।भ्यः। विश्वदेवनेत्रेभ्यः।
पश्चात्सभ्यः। विश्वदेवनेत्रेभ्य इति विश्वदेवऽनेत्रेभ्यः। पश्चात्सभ्यो मित्रावरूणानेत्रेभ्यः। पश्चा
त्सभ्य इति पश्चात्सत्।भ्यः। मित्रावरूणनेभ्यो वा। मित्रावरूणनेत्रेभ्य इति मित्रावरूणऽनेत्रेभ्यः।
वा मरुन्नेत्रेभ्यः। मरुन्नेभ्यो वा। मरुन्नेत्रेभ्य इति मरुत्। नेत्रेभ्यः। वोत्तरसभ्यः। उत्तरसभ्यः सो
मनेत्रेभ्यः। उत्तरसभ्य इत्युत्तरसत्।भ्यः। सोमनेत्रेभ्यो देवेभ्यः। सोमनेत्रेभ्य इति सोमऽनेत्रे
भ्यः। देवेभ्य उपरिसभ्यः। उपरिसभ्यो दुवस्वभ्यः। उपरिसभ्य इत्युपरिसत्।भ्यः। दुवस्वभ्यः ॥५६॥
स्वाहा। दुवस्वभ्य इति दुवस्वत्।भ्यः। स्वाहा। वे॥ ९॥ ये देवाः। देवा अग्निनेत्राः। अग्निनेत्राः पुरःस
दः। अग्निनेत्रा इत्यग्निऽनेत्राः। पुरःसदो यमनेत्राः। पुरःसद इति पुरःसदः। यमनेत्रा दक्षिणसदः।

यमनेत्रा इति यमऽनेत्राः। दक्षिणासदो विश्वेदेवनेत्राः। दक्षिणासद इति दक्षिणाऽसदः। विश्वेदेवनेत्राः पश्चात्सदः।
विश्वेदेवनेत्रा इति विश्वेदेवऽनेत्राः। पश्चात्सदो मित्रावरुणनेत्राः। पश्चात्सद इति पश्चात्ऽसदः। मित्रावरुणनेत्रा
वा। मित्रावरुणनेत्रा इति मित्रावरुणऽनेत्राः। वा मरुन्नेत्राः। मरुन्नेत्रा वा। मरुन्नेत्रा इति मरुत्ऽनेत्राः। वोत्तरसदः।
उत्तरसदः सोमनेत्राः। उत्तरसद इत्युत्तरऽसदः। सोमनेत्रा उपरिसदः। सोमनेत्रा इति सोमऽनेत्राः। उपरिस
दो दुवस्वन्तः। उपरिसद इत्युपरिऽसदः। दुवस्वन्तस्तेभ्यः। तेभ्यस्स्वाहा। स्वाहेति स्वाहा॥ २॥ अग्ने सहस्व। सहस्व
पृतनाः। पृतना अभिमातीः। अभिमातीरप। अभिमातीरित्यभिऽमातीः। अपास्य। अस्येत्यस्य। दुष्टरस्तरन्।
दुःस्तर इति दुस्तरः। तरन्नरातीः। अरातीर्वर्चः। वर्चो धाः। धा यज्ञवाहसि। यज्ञवाहसीति यज्ञऽवाहसि॥ ३॥
उपांशोर्वीर्येण। उपांशोरित्युपाऽअंशोः। वीर्येण जुहोमि। जुहोमि हतं। हतं रक्षः। रक्षः स्वाहा। स्वाहा रक्षसां।
रक्षसां त्वा। त्वा वधाय। वधायावधिष्म। अवधिष्म रक्षः। रक्षो मुष्म। अमुष्म त्वा। त्वा वधाय। वधायामुं। अ
मुमवधिष्म। अवधिष्म जुषाणः। जुषाणो ध्वा। अध्वाज्यस्य। आज्यवेतु। वेतु स्वाहा। स्वाहेति स्वाहा॥ ४॥ ७॥

933

॥९८॥ अपोदेवाः।देवामधुमतीः।मधुमतीरगृभ्णां।मधुमतीरितिमधुऽमतीः।अगृभ्णान्नूर्जस्वतीः।ऊर्जस्वतीराजस्वः।
राजस्वश्चितानाः।राजस्वइतिराजःऽस्वः।चितानाइतिचितानाः।याभिर्मित्रावरुणौ।मित्रावरुणावभि।अभ्यषिं
चन्।अषिंचन्याभिः।याभिरिंद्रं।इंद्रमनयन्।अनयन्नति।अत्यरातीः।अरातीरित्यरातीः॥१॥वृष्णऊर्मिः।ऊ
र्मिरसि।असिराष्ट्रदाः।राष्ट्रदाराष्ट्रं।राष्ट्रदाइतिराष्ट्रऽदाः।राष्ट्रंमे।मेदेहि।देहिस्वाहा।स्वाहावृष्णः।वृष्ण
ऊर्मिः।ऊर्मिरसि।असिराष्ट्रदाः।राष्ट्रदाराष्ट्रम्।राष्ट्रदाइतिराष्ट्रऽदाः।राष्ट्रममुष्मै।अमुष्मैदेहि।देहिवृष
सेनः।वृषसेनोर्थेतः।वृषसेनइतिवृषऽसेनः॥२॥अर्थेतओजस्वतीः।अर्थेतइत्यर्थऽइतः।ओजस्वतीरा
पः।आपःपरिवाहिणीः।परिवाहिणीरपान्।परिवाहिनीरितिपरिऽवाहिनीः।अपांपतिः।पतिरपां।अपांग
र्भः।गर्भःसूर्यवर्चसः।सूर्यवर्चसःसूर्यत्वचः।सूर्यवर्चसइतिसूर्यऽवर्चसः।सूर्यत्वचोव्रजक्षितः।सूर्यत्वच ॥९८॥
इतिसूर्यऽत्वचः।व्रजक्षितोवाशाः।व्रजक्षितइतिव्रजऽक्षितः।वाशामांदाः।मांदाःशक्वरीः।शक्वरीर्जनभृतः।
जनभृतोविश्वभृतः।जनभृतइतिजनऽभृतः।विश्वभृतःशयिष्ठाः।विश्वभृतइतिविश्वऽभृतः।शयिष्ठाआपः॥

आपः स्वाराज्ञीः। स्वाराज्ञीः स्थ। स्वाराज्ञीरिति स्वऽराज्ञीः। स्थ राष्ट्रदाः। राष्ट्रदा राष्ट्रं। राष्ट्रदा इति रा
ष्ट्रऽदाः। राष्ट्रममुष्मै। अमुष्मै दत्त। दत्त सं॥ ७॥ सं मधुमतीः। मधुमतीर्मधुमतीभिः। मधुमतीरि
ति मधुऽमतीः। मधुमतीभिः पृच्यध्वं। मधुमतीभिरिति मधुऽमतीभिः। पृच्यतामहि। महि क्ष
त्रं। क्षत्रं क्षत्रियाय। क्षत्रियाय वन्वानाः। वन्वाना अनाधृष्टाः। अनाधृष्टाः सीदत। सीदत
सह। सहौजसः। ओजसा महि। महि क्षत्रं। क्षत्रं क्षत्रियाय। क्षत्रियाय दधतीः। दधतीरिति
दधतीः॥ ८॥ सविता त्वा। त्वा प्रसवानां। प्रसवानां सुवताम्। प्रसवानामिति प्रऽसवानां।
सुवतामग्निः। अग्निर्गृहपतीनां। गृहपतीनां सोमः। गृहपतीनामिति गृहऽपतीनां। सो
मो वनस्पतीनां। वनस्पतीनां बृहस्पतिः। बृहस्पतिर्वाचे। वाच इंद्रः। इंद्रो ज्यैष्ठ्याय। ज्यै
ष्ठ्याय रुद्रः। रुद्रः पशूनां। पशूनां मित्रः। मित्रः सत्याय। सत्याय वरुणः। वरुणो धर्मपतीनां।
धर्मपतीनामिमे। धर्मपतीनामिति धर्मऽपतीनाम्॥ ९॥ इमं देवाः। देवा असपत्नं। असपत्नं

वसुध्वम्।सुवध्वंमहते।महतेक्षत्राय।क्षत्रायमहते॥महतेज्यैष्ठ्याय।ज्यैष्ठ्यायेमं।इममसु
अमुममुष्य।अमुष्यपुत्रं।पुत्रममुष्याः।अमुष्याःपुत्रं।पुत्रमस्यै।अस्यैविशे।विशऽएषः॥१०॥
एषवः।वःकुरवः।कुरवोराजा।राजैषः।एषवः।वष्पञ्चालाः।पंचालाराजा।राजासोमः।सोमोऽस्मा
कं।अस्माकंब्राह्मणानां।ब्राह्मणानांराजा।राजेतिराजा॥११॥सोमस्यत्विषिः।त्विषिरसि
अस्पत्नये।अग्नयेस्वाहा।स्वाहासोमाय।सोमायसवित्रे।सवित्रेसरस्वत्यै।सरस्वत्यैपूष्णे।
पूष्णेबृहस्पतये।बृहस्पतयइंद्राय॥१२॥इंद्रायांशाय।अंशायश्लोकाय।श्लोकायघोषाय।
घोषायभगाय।भगायार्य्यम्णो।अर्यम्णो।निभृष्टे।अनिभृष्टमसि।अनिभृष्टमिसनिऽभृष्टं।
असिवाचः।वाचोबंधुः।बंधुस्तपोजाः।तपोजाःसोमस्य।तपोजाइतितपःऽजाः।सोमस्यदात्रं।
दात्रमसि।असिस्वाहा।स्वाहाराजस्वः।राजस्वइतिराजस्वः॥१३॥सधमादोद्युम्निनीः।

सधमादइतिसधऽमादः।द्युम्निनीरापः।आपएताः।एताअनाधृष्टाः।अनाधृष्टाअपस्यः।

अपस्योवसानाः।वसानाइतिवसानाः।पस्त्यासुचक्रे।चक्रेवरुणः।वरुणःसधस्थं।सधस्थम
पां।सधस्थमितिसधऽस्थं।अपांशिशुः।शिशुर्मातृतमासु।मातृतमास्वन्तः।मातृतमास्वितिमातृ
तमासु।अंतरित्यंतः॥१४॥ क्षत्रस्योल्वं।उल्वंजरायु।जरायुनाभिः।नाभियोनिः।योनिरिंद्रस्य।इंद्र
स्यवार्त्रघ्नं।वार्त्रघ्नमसि।वार्त्रघ्नमितिवार्त्रऽघ्नं।असित्वया।त्वयायं।अयंवृत्रं।वृत्रंवध्यात्।वध्या
न्मित्रस्य।मित्रस्यासि।असिवरुणस्य।वरुणस्यासि।असिऋंरुजा॥१५॥ रुजाद्रुवा।द्रुवाक्षुपा।
क्षुपापात।पातैनं।एनंप्रांचं।प्रांचंप्रत्यंचं।प्रत्यंचंतिर्यंचं।तिर्यंचुदिग्भ्यः।दिग्भ्यःपात।दिग्भ्य
इतिदिक्ऽभ्यः।पाताविः॥१६॥ आविर्मर्याः।मर्याआवित्तः।आवित्तोअग्निः।आवित्तइत्याऽवित्तः।
अग्निर्गृहपतिः।गृहपतिरिंद्रः।गृहपतिरितिगृहऽपतिः।इंद्रोवृद्धश्रवाः।वृद्धश्रवाःपूषा।वृद्ध
श्रवाइतिवृद्धऽश्रवाः।पूषाविश्ववेदाः।विश्ववेदाआवित्तौ।विश्ववेदाइतिविश्वऽवेदाः।आवित्तौमित्रा
वरुणौ॥ आवित्ताइत्याऽवित्तौ।मित्रावरुणौधृतव्रतौ।धृतव्रतावावित्तौ।धृतव्रताइतिधृतऽव्रतौ॥

९३५

॥६९॥ आवित्ते द्यावापृथिवी। आवित्ते इत्याऽवित्ते। द्यावापृथिवी विश्वशंभू। द्यावापृथिवी इति द्यावापृथिवी॥
विश्वशंभू आवित्ता। विश्वशंभू इति विश्वऽशंभू। आवित्ता अदितिः। आवित्तेत्याऽवित्ता। अदितिरुरुश
र्मा। उरुशर्मेत्युरुऽशर्मा॥७॥ अवेष्टा दंदशूकाः। अवेष्टा इत्यवऽइष्टाः। दंदशूकाः प्राचीम्। प्राचीमा
रोह। आरोह। रोह गायत्री। गायत्री त्वा। त्वावतु। अवतु रथंतरम्॥ रथंतरं साम। रथंतरमिति रथं
तरं। साम त्रिवृत्। त्रिवृत्स्तोमः। त्रिवृदिति त्रिऽवृत्। स्तोमो वसंतः। वसंत ऋतुः। ऋतुर्ब्रह्म। ब्रह्म द्रवि
णं। द्रविणं दक्षिणां॥८॥ दक्षिणामारोह। आरोह। रोह त्रिष्टुप्। त्रिष्टुप्त्वा। त्रिष्टुबिति त्रिऽस्तुप्। त्वा
वतु। अवतु बृहत्। बृहत्साम। साम पंचदशः। पंचदश स्तोमः। पंचदश इति पंचऽदशः। स्तोमो ग्रीष्मः।
ग्रीष्म ऋतुः। ऋतुः क्षत्रं। क्षत्रं द्रविणं। द्रविणं प्रतीचीं॥१९॥ प्रतीचीमारोह। आरोह। रोह जगती। जग
ती त्वा। त्वावतु। अवतु वैरूपं। वैरूपं साम। साम सप्तदशः। सप्तदश स्तोमः। सप्तदश इति सप्तऽदशः। ॥६९॥
स्तोमो वर्षाः। वर्षा ऋतुः। ऋतुर्विट्। विड्द्रविणम्। द्रविणमुदीचीं॥२०॥ उदीचीमारोह। आरोह। रोहानुष्टु

श। अनुष्टुप्सा। त्वावतु। अनुस्तु बिस्तनु ऽ स्तुश्। अवसुवैराज्जं। वैराज्जं साम। सामैकवींशः। एकवींशस्तोमः।
एकविंशइत्येक ऽ वींशः। स्तोमः शरत्। शरदृतुः। ऋतुः फलं। फलंद्रविणं। द्रविणमूर्ध्वा॥२१॥ ऊर्ध्वामारोह।
आरोह। रोहपंक्तिः। पंक्तिस्त्वा। त्वावतु। अवतुश्शाक्वररैवते। शाक्वररैवते सामनी। शाक्वररैवते इति शा
क्वररैवते। सामनी त्रिणवत्रयस्त्रींशौ। सामनी इति सामनी। त्रिणवत्रयस्त्रींशौ स्तोमौ। त्रिनवत्र
यस्त्रींशाविति त्रिनवत्रयस्त्रींशौ। स्तोमौ हेमंत्तशिशिरौ। हेमंत्तशिशिरावृतू। ऋतूवर्च्चः। वर्च्चोद्रवि
णं। द्रविणमिति द्रविणं। प्रत्यस्तं नमुचेः। प्रत्यस्तमिति प्रति ऽ अस्तं। नमुचेः शिरः। शिर इति शिरः॥२२॥
सोमस्य त्विषिः। त्विषिरसि। असि तवेव। तवेव मे। तवेवेति तव ऽ इव। मे त्विषिः। त्विषिर्भूयात्। भूयादि
ति भूयात्। मृत्योः पाहि। पाह्योजः। ओजस्सहः। सहोमृतं। अमृतमसि। असीष्यसा॥२३॥ हिरण्य
रूपा उषसः। हिरण्यरूपा इति हिरण्य ऽ रूपौ। उषसो विरोके। विरोक ऽ उभौ। विरोक इति वि ऽ रोके। उभावि
न्द्रौ। इन्द्रा उत्। उदितः। इतस्सूर्यः। सूर्यश्च। चेति च। आरोहतं। रोहतं वरुण। वरुण मित्र। मित्र गर्त्तं।
गर्त्तं ततः। ततश्चक्षाथां। चक्षाथामदितिं। अदितिं दितिं। दितिं च। चेति च। मित्रोसि। असि व

वरुणः।वरुणोसि।असीत्यसि॥२४॥सोमस्यत्वा।त्वाद्युम्नेन।द्युम्नेनाभि।द्युम्नेनाभि।अभिषिंचामि।
॥८९॥ सिंचाम्यग्नेः।अग्नेर्भ्राजसा।भ्राजसासूर्यस्य।सूर्यस्यवर्चसा।वर्चसेन्द्रस्य।इन्द्रस्येन्द्रियेण।इन्द्रियेण
मरुत्तां।मरुत्तामोजसा।ओजसाक्षत्राणां।क्षत्राणांक्षत्रपतिः।क्षत्रपतिरेधि।क्षत्रपतिरितिक्ष
त्रऽपतिः।एध्यति।अतिदिद्यून्।दिद्यून्पाहि।पाहिजानराज्याय।आनराज्यायेतिज्यानऽराज्याय॥२५॥
प्रपर्वतस्य।पर्वतस्यवृषभस्य।वृषभस्यपृष्ठात्।पृष्ठान्नावः।नावश्चरंति।चरंतिस्वसिचः।स्वसिच
इयानाः।स्वसिचरतिस्वऽसिचः।इयानाइतीयानाः।ताआववृत्रं।आववृत्रन्न।अववृत्रन्नधराक्।
अधरागुदक्।उदक्ताः।ताअहिं।अहिंबुध्न्यं।बुध्न्यमनु।अनुरीयमाणाः।रीयमाणाइतिनिरीयमाणाः।
विष्णोर्विक्रमणं।विक्रमणंविक्रांतं।क्रान्तमसि।असीत्यसि॥२६॥प्रजापतेन।प्रजापतइतिप्रजाऽ
पते।नत्वत्।त्वदेतानि।एतान्यन्यः।अन्योविश्वा।विश्वारूपाणि।रूपाणिपरि।परिता।ताबभूव।
बभूवेतिबभूवऽयत्कामास्ते।यत्कामाइतियत्।कामाः।तेजुहुमः।जुहुमस्तत्।तन्नः।नोअस्तु। ॥८९॥

1

अस्त्तुवयं।वयंस्याम।स्यामपत्तयः।पत्तयोरयीणां।रयीणामित्तिरयीणां॥ २७॥ रुद्रयत्त।यत्ते।तेक्रि
वि।क्रिविपरं।परन्नाम।नामत्तस्मै।तस्मैहुत्तं।हुत्तमसि।अस्यमेष्टं।अमेष्टमसि।अमेष्टमित्यमऽइष्टं।
असिस्वाहा।स्वाहेत्तिस्वाहा॥ २८॥ इन्द्रस्यवज्रः।वज्रोसि।असिमित्रावरुणयोः।मित्रावरुणयोस्त्त्वा।
त्वाप्रशास्त्रोः।प्रशास्त्रोःप्रशिषा।प्रशास्त्रोरित्तिप्रऽशास्त्रोः।प्रशिषायुनज्मि।प्रशिषेत्तिप्रऽशिषा।
युनज्म्यव्यथायै।अव्यथायैत्त्वा।त्त्वास्वधायै।स्वधायैत्त्वा।त्त्वारिष्टः।अरिष्टःफल्गुनः।फल्गुनोमरुत्तां।
मरुत्तांप्रसवेन।प्रसवेनजय।प्रसवेनेत्तिप्रऽसवेन।जयापाम।आपाममनसा।मनसासं।समिंद्रि
येण।इंद्रियेणेत्तीन्द्रियेण॥ २९॥ मात्ते।त्तइंद्र।इंद्रत्ते।त्तेवयं।वयंत्तुराषाड्।तुराषालयुक्तासः।अयु
क्तासोअब्रह्मत्ता।अब्रह्मत्ताऽवि।विदसाम।दसामेत्तिदसाम।तिष्ठारथं।रथमधि।अधियत्त।यद्वज्रह
स्त।वज्रहस्तारश्मीन्।वज्रहस्तेत्तिवज्रऽहस्त।आरश्मीन्।रश्मींदेव।देवयुवसे।युवसेस्वश्वान्।
स्वश्वानित्तिसुऽअश्वान्॥ ३०॥ अग्नयेगृहपत्तये।गृहपत्तयेस्वाहा।गृहपत्तयइत्तिगृहऽपत्तये।स्वाहासोमाय।

९३

सोमायवनस्पतये। वनस्पतयइंद्रस्य। इंद्रस्येंद्रियाय। इंद्रियायमरुत्तां। मरुत्तामोजसे। ओजसेपृथिवि। पृ
॥८१॥ थिविमातः। मातर्मा। मामा। मांहिंसीः। हिंसीर्मा। मोअहं। मोइतिमो। अहंत्वां। त्वामितित्वां॥२१॥ हंसः
शुचिषत्। शुचिषद्वसुः। शुचिसदितिशुचिऽसत्। वसुरंतरिक्षसत्। अंतरिक्षसद्धोता। अंतरिक्षसदि
त्यंतरिक्षऽसत्। होता। वेदिषत्। वेदिषदतिथिः। वेदिसदितिवदि। सत्। अतिथिर्दुरोणसत्। दुरोण
सदितिदुरोणसत्। नृषद्वरसत्। नृसदितिनृऽसत्। वरसदृतसत्। वरसदितिवरऽसत्। ऋतसद्व्यो
मसत्। ऋतसदित्यृतऽसत्। व्योमसदब्जाः। व्योमसदितिव्योमऽसत्। अब्जागोजाः। अब्जाइत्यप्
जाः। गोजाऋतजाः। गोजाइतिगोऽजाः। ऋतजाअद्रिजाः। अद्रिजाऋतं। अद्रिजाइत्यद्रिऽजाः। ऋ
तंबृहत्। बृहदितिबृहत्॥२२॥ इयदसि। अस्यायुः। आयुरसि। अस्यायुः। आयुर्मे। मेधेहि। धेहियुङ्।
युङ्ङसि। असिवर्चः। वर्चोसि। असिवर्चः। वर्चोमे। मेधेहि। धेह्यूर्क्। ऊर्गसि। अस्यूर्जं। ऊर्जंमयि। मयिधे
हि। धेहीद्रस्य। इंद्रस्यवां। वांबाहू। बाहूवीर्यकृतो। बाहूइतिबाहू। वीर्यकृताउपावहरामि। वीर्यकृता ॥८१॥
इतिवीर्यऽकृता। उपावहरामीत्युपऽअवहरामि॥२३॥ स्योनासि। असिसुषदा। सुषदाक्षत्रस्य। सुस

दाइति सुऽसदाः। क्षत्रस्य योनिः। योनिरसि। असि स्योनां। स्योनामासीद। आसीद। सीद सुषदां। सुषदां
क्षत्रस्य। सुसदामिति सुऽसदां। क्षत्रस्य योनिं। योनिमासीद। आसीद। सीदेति सीद॥२४॥ निषसाद।
साद धृतव्रतः। धृतव्रतो वरुणः। धृतव्रत इति धृतऽव्रतः। वरुणः पस्त्यासु। पस्त्यास्वा। त्स्या। साम्राज्या
य सुक्रतुः। साम्राज्यायेति सां। राज्याय। सुक्रतुरिति सुऽक्रतुः॥२५॥ अभिभूरसि। अभिभूरित्यभिऽ
भूः। अस्ययानां। अयानामेताः। एतास्ते। ते पंच। पंच दिशः। दिशः कल्पंतां। कल्पंतां ब्रह्मन्। ब्र
ह्मंस्त्वं। त्वं ब्रह्मा। ब्रह्मासि। असि सविता॥२६॥ सवितासि। असि सत्यप्रसवः। सत्यप्रसवो वरुणः।
सत्यप्रसव इति सत्यऽप्रसवः। वरुणः सत्योजाः। सत्योजा इंद्रः। सत्योजा इति सत्यऽओजाः। इंद्रोसि
विशौजाः। विशौजा इंद्रः। इंद्रः सुशेवः। सुशेवः प्रियंकर। सुशेव इति सुऽशेवः॥२७॥ प्रियंकर श्रेयस्क
र। प्रियंकरेति प्रियंऽकर। श्रेयस्कर भूयस्कर। श्रेयःकरेति श्रेयःऽकर। भूयस्करेंद्रस्य। भूयःकरेति भू
यःऽकर। इंद्रस्य वज्रः। वज्रोसि। असि तेन। तेन मे। मे रध्य। रध्य। ग्निः॥२८॥ अग्निः पृथुः। पृथुर्ध

॥८२॥

र्मणः । धर्मणस्पतिः । पतिर्जुषाणः । जुषाणो अग्निः । हविषो वेतु । वेतु स्वाहा । स्वाहा स्वाहाकृताः ।
स्वाहाकृताः सूर्यस्य । स्वाहाकृता इति स्वाहाऽकृताः । सूर्यस्य रश्मिभिः । रश्मिभिर्यतध्वं । रश्मिभि
रिति रश्मिऽभिः । यतध्वं सजातानां । सजातानां मध्यमेष्ठ्याय । सजातानामिति सऽजातानां ॥
मध्यमेस्थ्यायेति मध्यमेस्थ्याय ॥३९॥ सवित्रा प्रसवित्रा । प्रसवित्रा सरस्वत्या । प्रसवित्रेति प्रऽस
वित्रा । सरस्वत्या वाचा । वाचा त्वष्ट्रा । त्वष्ट्रा रूपैः । रूपैः पूष्णा । पूष्णा पशुभिः । पशुभिरिंद्रेण । पशुभिरि
ति पशुऽभिः । इन्द्रेणास्मे । अस्मे बृहस्पतिना ॥५०॥ बृहस्पतिना ब्रह्मणा । ब्रह्मणा वरुणेन । वरुणे
नौजसा । ओजसाग्निना । अग्निना तेजसा । तेजसा सोमेन । सोमेन राज्ञा । राज्ञा विष्णुना । विष्णुना देवतया ।
देवतया दशम्या । दशम्येमं । इमं यज्ञं । यज्ञं विष्णुं । विष्णुमाप्नवानि । आप्नवानीत्याप्नवानि ॥४०॥ अश्वि
भ्यां पच्यस्व । अश्विभ्यामित्यश्विऽभ्यां । पच्यस्व सरस्वत्यै । सरस्वत्याऽइंद्राय । इन्द्राय सुत्राम्णे । सुत्राम्णे
पच्यस्व । सुत्राम्णा इति सुऽत्राम्णे । पच्यस्वेति पच्यस्व । वायोः पूतः । पूतः पवित्रेण । पवित्रेण प्रत्यङ् •

१४३

॥८२॥

१४८

भ्रस्यऽसोमः। सोमोअतिस्रुतः। अतिस्रुतइत्यतिऽस्रुतः। इंद्रस्ययुज्यः। युज्यःसखा। सखेति
सखा॥७१॥ कुविदंग। अंगयवमंतः। यवमंतोयवं। यवमंतइतियवऽमंतः। यवंचित्। चि
द्यथा। यथादंति। दांत्यनुपूर्वं। अनुपूर्वंवियूय। अनुपूर्वमित्यनुऽपूर्वं। वियूयेतिविऽयूय। इहे
हैषां। इहेतीहऽइह। एषांकृणुहि। कृणुहिभोजनानि। भोजनानिये। येबर्हिषः। बर्हिषो
नमउक्तिं। नमउक्तिंन्न। नमउक्तिमितिनमःऽउक्तिं। नजग्मुः। जग्मुरितिजग्मुः। आश्विभ्यांत्वा।
अश्विभ्यामित्यश्विऽभ्यां। त्वासरस्वत्यै। सरस्वत्याइंद्राय। इन्द्रायसुत्राम्णे। सुत्राम्णइतिसु
त्राम्णे॥७२॥ युवंसुरामं। सुराममश्विना। अश्विनानमुचौ। नमुचावासुरे। आसुरेसचा। सचे
तिसचा। विपिपानाशुभः। विपिपानेतिविऽपिपाना। शुभस्पती। पतीइंद्रं। पतीइतिपती। इं
द्रंकर्मसु। कर्मस्वावतं। कर्मस्वितिकर्म। आवतमित्याऽअवतं॥७३॥ पुत्रमिवपितरौ। पुत्रमि
वेतिपुत्रं। इव। पितराअश्विना। अश्विनोभा। उभेंद्रा। इंद्रावथुः। आवथुःकाव्यैः। काव्यैर्दं

सनाभिः। दांसनाभिरिदांसनाभिः॥ यत्सुरामं। सुरामं वि। व्यपिबः। अपिबः शचीभिः। शची
भिः सरस्वती। सरस्वती त्वा। त्वा मघवन्। मघवन्नभिष्णक्। मघवन्निति मघऽवन्। अभि
ष्णगित्यभिष्णक्॥३४॥ इतिक्रमपाठे एकादशोध्यायः॥ युञ्जानः प्रथमं। प्रथमं मनः। मनस्त
त्त्वाय। तत्त्वाय सविता। सविता धियः। धिय इति धियः। अग्नेर्ज्योतिः। ज्योतिर्निचाय्य। निचा
य्य पृथिव्याः। निचाय्येति निऽचाय्य। पृथिव्या अधि। अध्याभरत्। आभरत्। अभरदित्यभ
रत्॥१॥ युक्तेन मनसा। मनसा वयं। वयं देवस्य। देवस्य सवितुः। सवितुः सवे। सव इति सवे।
स्वर्ग्याय शक्त्या। स्वर्ग्यायेति स्वःऽग्याय। शक्त्येति शक्त्या॥२॥ युक्त्वाय सविता। सविता
देवान्। देवान्त्स्वः। स्वर्यतः। यतो धिया। धिया दिवम्। दिवमिति दिवं। बृहज्ज्योतिः करिष्यतः।
करिष्यतः सविता। सविता प्र। प्र सुवाति। सुवाति तान्। तानिति तान्॥३॥ युजे वाम्।

वां ब्रह्म। ब्रह्म पूर्व्यं। पूर्व्यं नमोभिः। नमोभिर्वि। नमोभिरिति नमः। भिः। विश्लो
का। श्लोक एतु। एतु पथ्येव। पथ्येव सूरेः। पथ्येवेति पथ्या। इव। सुरेरिति सुरेः। शृण्वं
न्तु विश्वे। विश्वे अमृतस्य। अमृतस्य पुत्राः। पुत्रा आये। आये। ये धामानि। धामानि दि
व्यानि। दिव्यानि तस्थुः। तस्थुरिति तस्थुः॥ ३॥ यस्य प्रयाणम्। प्रयाणमनु। प्रयान
मिति प्रऽयानम्। अन्वन्ये। अन्यत्। इद्ययुः। ययुर्देवाः। देवा देवस्य। देवस्य महिमा
नं। महिमानमोजसा। ओजसेत्योजसा। यः पार्थिवानि। पार्थिवानि विममे। विम
मे स[illegible]। विममइति विऽममे। स एतशः। एतशो रजांसि। रजांसि देवः। देवः
सविता। सविता महित्वना। महित्वनेति महिऽत्वना॥ ४॥ देव सवितः। सवितः प्र। स
वितरिति सवितः। प्रसुव। सुव यज्ञं। यज्ञं प्र। प्रसुव। सुव यज्ञपतिं। यज्ञपतिं भगाय।

[illegible]

यज्ञपतिमितियज्ञऽपतिं। भगायेतिभगाय। दिव्योगंधर्वः। गंधर्वःकेतपूः। केतपूःकेतम्।
॥७४॥ केतपूरितिकेतऽपूः। केतन्नः। नःपुनातु। पुनातुवाचः। वाचस्पतिः। पतिर्वाचम्। वाच
न्नः। नःस्वदतु। स्वदत्वितिस्वदतु॥७॥ इमन्नः। नोदेव। देवसवितः। सवितर्यज्ञं।
यज्ञंप्र। प्रनय। नयदेवाव्यं। देवाव्यंसखिविदं। देवाव्यमितिदेवऽअव्यं। सखिविदं
सात्राजितं। सखिविदमितिसखिऽविदं। सत्राजितंधनजितं। सत्राजितमितिस
त्राऽजितम्। धनश्स्वर्जितं। धनजितमितिधनऽजितम्। स्वर्जितमितिस्वःऽजितं।
ऋचास्तोमं। स्तोमंसं। समर्धय। अर्धयगायत्रेण। गायत्रेणरथंतरं। रथंतरंबृहत्।
रथंतरमितिरथंऽतरम्। बृहद्गायत्रवर्त्तनी। गायत्रवर्त्तनिस्वाहा। गायत्रवर्त्तनी ॥७४॥
तिगायत्रऽवर्त्तनि। स्वाहेतिस्वाहा॥८॥ आददे। ददेगायत्रेण। गायत्रेणछंदसा। छं
दसांगिरस्वत्। अंगिरस्वत्पृथिव्याः। पृथिव्याःसधस्थात्। सधस्थादग्निं। सधस्था

दितिसधऽस्थात्।अग्निंपुरीष्यं।पुरीष्यमंगिरस्वत्।अंगिरस्वदाभर।आभर।भरत्रैष्टु
भेन।त्रैष्टुभेनछंदसा।त्रैष्टुभेनेतित्रैष्टुभेन।छंदसांगिरस्वत्।अंगिरस्वदभ्रिः।।९।।अ
भ्रिरसि।असिनारी।नार्यसि।असित्वया।त्वयावयं।वयमग्निं।अग्निंशकेम।शके
मखनितुंतुं।खनितुंसधस्थे।सधस्थआ।आजागतेन।सधस्थइतिसधऽस्थे।आजा
गतेन।जागतेनछंदसा।छंदसांगिरस्वत्।अंगिरस्वदित्यंगिरस्वत्।।१०।।हस्ते।आ
धाय।आधायसविता।आधायेत्याऽधाय।सविता।बिभ्रत्।बिभ्रदभ्रिं।अभ्रिंहिर
ण्ययीं।हिरण्ययीमितिहिरण्ययीं।अग्नेर्ज्योतिः।ज्योतिःज्योतिर्निचाय्य।निचाय्यपृथि
व्याः।निचाय्येतिनिऽचाय्य।पृथिव्याअधि।अध्याभरत्।आभरत्।आभरदानुष्टुभेन।
आनुष्टुभेनछंदसा।आनुष्टुभेनेत्यानुऽस्तुभेन।छंदसांगिरस्वत्।अंगिरस्वदित्यं

१४८

॥८५॥ गिरस्स्वत ॥११॥ प्रतूर्तं वाजिन्नू । प्रतूर्तमिति प्रऽतूर्तं । वाजिन्ना द्रव । आद्रव । प्रववरिष्मा । व
रिष्मामनु । अनु संवतं । संवतमिति सम् । वतम् । दिवि ते । ते जन्म । जन्म परमम् । परमम
